शात् भवद्भिरेवविक्रम्यनिग्रहीतानांइतिचेद्दत्ताहुः ॥ यइति ॥ यएकोयुतमतंगजानांवीर्यंबि
भ्रत् ॥ स्वभवनेभूभुजोस्मान् ॥ रुरोधसिंहोमेषीरिव ॥ किंचयुष्मदीयावयमिति ॥ अस्मानर्थिकंवा
धते ॥ इत्याहुर्योवेति ॥ २६ ॥ ॥ श्रीरामचंद्रायनमः ॥ ॥ राम ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा० द० उ० टी० ८५

देउदात्तचक्र उद्यतस्तदर्पेण ॥ यो वै द्विनवकृत्वः अष्टादशवारान् त्वया सह मृधे युद्धे मानेत्तत्र सप्तदशकृत्वः
त्वया भग्नः खलु पराजितः ॥ पश्चादनेनं वीर्यमपि न्द्र लोकनिरतं नरशील विनोदं भवंतं सकृत् जित्वा ऊढ
दर्पः प्राप्तगर्वः युष्मत्प्रजाः नः रुजति पीडयति तत्त्वं यत् युक्तं तद्विधेहि इत्यर्थः ॥ इत्याहेति ॥ इति २

योवान्वया द्विनवकृत्व उदात्तचक्र भग्नो मृधे खलु भवंतमनंतवीर्यं ॥ जित्वात्मलोकनिरतं सकृ
दूढदर्पो युष्मत्प्रजा रुजति नो जित तद्विधेहि ॥ २५ ॥ इति मागधसंरुद्धा भवद्दर्शनकांक्षिणः ॥
प्रपन्नाः पादमूलं ते दीनानां शं विधीयतां ॥ २६ ॥ राजदूते ब्रुवत्येवं देवर्षिः परमद्युतिः ॥ बिभ्र
त्पिंगजटाभारं प्रादुरासीद्यथा रविः ॥ २७ ॥ तं दृष्ट्वा भगवान्कृष्णः सर्वलोकेश्वरेश्वरः ॥ ववंद
उत्थितः शीर्ष्णा ससभ्यः सानुगो मुदा ॥ २८ ॥ सभाजयित्वा विधिवत्कृतासनपरिग्रहं ॥ बभा
षे सूनृतैर्वाक्यैः श्रद्धया तर्पयन्मुनिम् ॥ २९ ॥ अपि स्विदद्य लोकानां त्रयाणामकुतोभयं
ननु भूयान्भगवतो लोकान्पर्यटतो गुणः ॥ ३० ॥ न हि तेऽविदितं किंचिल्लोकेष्वीश्वरकर्तृ
षु ॥ अथ पृच्छामहे युष्मान्पांडवानां चिकीर्षितम् ॥ ३१ ॥ राम ॥

भूयान्महान् गुणो लाभः ॥ अथ अस्माकं यत्त्वत्सर्वज्ञत्वं तेन ज्ञातमिति ॥ ३० ॥ श्रीईश्वरः कर्ता ये
षां तेषु एवमविज्ञेषु एव सर्वं ज्ञातेन नु रासंधवधार्थमेव पांडवा चिकीर्षितं पृष्टो नारदो आयेयमिति ज्ञात्वा
ह ॥ दृष्टइति त्रिभिः ॥ २९ ॥ श्रीरामायनमः ॥ ॥ राम ॥ ॥ ॥ ॥ राम ॥ ॥ ॥

राम: ८५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विश्वमसृजस्त्वं ब्रह्मणोपि मायिनो मेष्वकस्यते स्वशक्तिभिर्विद्यादिभिः॥ भूतेष्वंतर्यामितया चरतो व-
तेयानस्याय यत्वं भूतेषु वर्तीनर्दिं भूतानि किमिति नयथं तेनिवर्कोरिव कस्त्रवरूचरति॥ स्वशक्तिभिरेव बह-
ब्राकक प्रकाशाय सन्तस्य भूतसदेदं भूत्मादिकमेद्भुतं॥३८॥ सृदेजगत्कर्थ भूतं श्रसदेव तत्वमायया
विद्यमानात्मनया अवभासमेतेन जगत् सृजतः॥ किं व केवलं तेन भूमनमेव शक्यमित्याह॥ तस्मेन
मरतिऊना येन हृपेणश्वर्वेनोवितत्यणात्मने॥ अविंन्यायेस्यथेः॥ नत्वेतस्य किमायावेष्टिनेरित्यत

श्रीनारद उवाच॥ इत्थं मया ते बहुशो हरव्यायासायाविभोविश्वसृजश्च मायिनः॥ भूतेषुभू-
तं श्रवरतः स्वशक्तिभिर्वह्नेरिव छन्नरुचो न मेऽद्भुतं॥३९॥ न वेद हि नेको हेतिसाध्वेदिवेसमा॥
ययेदं सृजतो नियच्छतः॥ यद्वियमाणात्मनयांवसीयते तस्मैनमस्ते विलक्षणात्मने॥४०॥
लीदस्यय संसरतोविमोक्षणं न जानतो नर्थवदाक्षरीरतः॥ लीलावतारैः स्वयशः प्रदीप-
कं प्रज्वालयत्तात नमद्दृ पप्रे॥४१॥ अथाप्याश्रावये ब्रह्मन् नरलोकविडंबनं॥ राजो... त्स्य
सृष्टीयस्य भक्तस्य च विकीर्षितं॥४२॥ यत्... स्त्वामवंते इराजत्स्त्रयेन सोऽड्वाः॥ पारमे... का
मोन्रपतिसन्न दृवाननुमोदतां मे॥४३॥

आह जीवस्येति॥ ३८॥ अविद्यातमसावृतत्वेन॥ अनर्थप्रापकात् शरीरात्संसरतः॥ तेनैव चुतमसा
तस्माच्छरीराद्विमोक्षोपायमजानतः॥ प्रज्वालयत् प्रदीपितवान्॥ तेनायशः श्रवणादिभिर्जीवस्य
मोक्षार्थमिति॥४१॥ आश्रावये श्रावयिष्यामि नरलोकविडंबनं ब्रह्मत्वो॥ ब्रह्मन्निति पाठे हे ब्रह्मन्॥
एवमात्मन॥ नरलोकानुकारिणं त्वां श्रावयिष्यतीति॥४२॥ नचैवायात् सोदनेकार्थं किं व तत्रागत
यं दृत्याश्रयेणाह॥ तस्मिन्निति॥४३॥ ॥

श्री॰
भाग॰
उ॰ टी॰
७०

तत्राप्तानां च सर्वेषां तद्दर्शनादिनाप्ततामभविष्यतीत्याह ॥ श्रवणादिति ॥ ४२ ॥ अनेवसायिनः श्वपचा अपि श्र
ल्मयस्य श्रवणकीर्तनेन स्मरतेः ॥ ईक्षाचाभिमर्शनं ॥ अभिमर्शनं स्पर्शनं च ते विद्यते येषां ते केऽपि त्वन्नाम्नो येना
हं ॥ यस्येति ॥ ४३ ॥ हे भुवनानां मंगलरूप दिवि पाताले भूमौ च श्रयितं यस्य पादशौचं विश्वं पुनाति कथं प्र
थितं दिवि वितानं दिग्भवनानां वितानवदलंकरणं ॥ तथा चरणं भुजगशायितं पुनाति ॥ कथं तत्प्रथितः

तस्मिन्नेव कुरुदेवे भवं तं वै सुरादयः ॥ दिदृक्षवः समेष्यन्ति राजानश्च यशस्विनः ॥ ४४ ॥ श्रव
णात्कीर्तनाद्ध्यानात्पूयन्तेऽन्तेवसायिनः ॥ तव ब्रह्ममयस्येश किमुतेक्षाभिमर्शिनः ॥ ४५ ॥ य
स्यामलं दिवि यशः प्रथितं रसायां भूमौ च ते भुवनमंगल दिग्वितानं । मन्दाकिनीति दिवि भो
गवतीति चाधो गंगेति चेह चरणाम्बु पुनाति विश्वं ॥ ४६ ॥ श्रीशुक उवाच । तत्र तेष्वात्मपक्षेष्व
गृह्णत्सु विजिगीषया ॥ वाचः पेशैः स्मयन् भृत्यमुद्धवं प्राह केशवः ॥ ४७ ॥ श्रीभगवानुवाच ॥
त्वं हि नः परमं चक्षुः सुहृन्मन्त्रार्थतत्त्ववित् ॥ तथात्र ब्रूह्यनुष्ठेयं श्रद्दध्मः करवाम हे ॥ ४८ ॥

तं दिवि मन्दाकिनीति ॥ अधस्तु भोगवतीति ॥ इह भूमौ च गंगेति ॥ तस्य तवागमनात्सर्वं मंगलं प्र
विष्टं भविष्यतीति भावः ॥ ४४ ॥ तत्रैवं नारदोक्ते ॥ तेषु तत्र वर्तमानेषु आत्मीयपक्षेषु यादवेषु जरासं
धस्य जिगीषया ॥ अवगृह्णत्सु अमन्यमानेषु वाचः पेशैः पेशलवाग्भिः स्मयन् ॥ ४७ ॥ चक्षुर्हेतुः
मन्त्राणां मन्त्रसाध्यानां तत्त्ववित् परिपाकवेदिता ॥ ४८ ॥ ॥

राम॰
७०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इतिश्रीभावार्थदप्रामेसप्ततितमः ॥ ७० ॥ अथैकसप्ततितमे उद्धवमतमेवतः ॥ इंद्रप्रस्थंगते कृष्णे पार्थानां परमो
त्सवः ॥ राजसूयमिषं कृष्णो भीमद्वैरथपातनादिषु ॥ कलिमत्यायतेहृत्वा भूभारम् इरद्विभुः ॥ देवर्षेर्नारदस्य म
तं राजसूयगमनं सभ्यानां मतं जरासंधहत्वा श्रीकृष्णस्यैवमिष्टतीमतिर्यस्यसः ॥ १ ॥ यदस्ततः यागं करिष्यतः पैतृ
ष्वस्रीयस्य पितृष्वसुः पुत्रस्य साचिव्यं साहाय्यं ॥ तत्र तत्र याशरणार्थिनां राज्ञां च ॥ तत्र प्रथमं राजसूयार्थं

श्रीशुक उवाच ॥ इत्युपामंत्रितो भर्त्रा सर्ववत्तानेपि मुग्धवत् ॥ निदेशं शिरसादाय उद्धवः प्रति
भाषत ॥ ७ ॥ इतिश्रीभागवते दशमस्कंधे श्रीभगवद्याने सप्ततितमोऽध्यायः ॥ ७० ॥ श्रीशुक उवा
च ॥ इत्युदीरितमाकर्ण्य देवर्षेरुद्धवोऽब्रवीत् ॥ सभ्यानां मतमाज्ञाय कृष्णस्य च महामतिः ॥ १ ॥
उद्धव उवाच ॥ यदुक्तमृषिणा देव साचिव्यं यक्ष्यतस्त्वया ॥ कार्यं पैतृष्वसेयस्य रक्षा च शरणैषिणां
॥ २ ॥ यष्टव्यं राजसूयेन दिक्चक्रजयिना विभो ॥ अतो जरासुतजय उभयार्थो मतो मम
॥ ३ ॥ अस्माकं च महानर्थो ह्येतेनैव भविष्यति ॥ यशश्च तव गोविंद राज्ञो बद्धान्विमुंचतः ॥ ४ ॥
स वै दुर्विषहो राजा नागायुतसमो बले ॥ बलिनामपि चान्येषां भीमं समबलं विना ॥ ५ ॥

गंतव्यं ॥ ततो राजरक्षा च कर्तव्येत्याह यष्टव्यमिति त्रिभिः ॥ २ ॥ अतो दिग्जयहेतोः उभयार्थः ॥ राजसूयार्थः
शरणागतरक्षार्थश्च ॥ ३ ॥ अत्युत्सुकतया सद्य एव ॥ जरासंधं हंतुमिच्छतो यादवानाल क्ष्याह स वै इति
॥ ४ ॥ अन्येषां ततो बलिनामपि यद्यपि समबल एव भीमः ॥ तथापि तं विना भीमादेव तस्मान्मृत्युर्विहित
इति भावः ॥ ५ ॥ रामाय नमः ॥ राम ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा०द०
उ०टी०
७१

ननु च बलसाम्येपि सेनाबलं तस्याधिकमिति चेत् तत्राह द्वैरथ इति ॥ द्वैरथयुद्धे प्राप्ते तेनासौ हिरण्योभियुक्तः मा जे
तव्य इत्यर्थः ॥ ननु भीमः स्वसैन्यमेव युद्धाय नियुंजीत कुतस्तेन द्वैरथमिति तत्राह ब्रह्मण्य इति न प्रत्याख्याति ॥
न निराकरोति ॥ ८ ॥ भिद्येतेन द्वंद्वयुद्धे यावता तथापि समबलत्वात्साम्यमेव स्यात् ॥ अत आह तव सन्निधा
विति ॥ ननु किंचित्सर्वेषां मम सन्निधानात् किं स्यात् तत्राह निमित्तमिति ॥ ९ ॥ अयमर्थः ॥ यद्यपि नववृद्धप
स्य कालात्मनो विश्वसर्गनिमित्तं केवलं हिरण्यगर्भः तथापि वेदभूतनिरोधे तथा त्वमेव सन्निधिमात्रे
णाद्य तामसोपि निमित्तमात्रमिति अतोनेनोपायेन त्वयास स्वरंदत्र इत्याप्रायेनाह गायंतीति ॥ ज

द्वैरथे स तु जेतव्यो मा शतानाक्षौहिणीयुतः ॥ ब्राह्मण्योभ्यर्थितो विप्रैर्न प्रत्याख्याति कर्हिचित्
ब्रह्मण्यदेवो धर्मात्मा भिद्येत हवृकोदरः ॥ हविष्यति [illegible] त्वसन्निधौ ॥ ९ ॥ निमित्तप
रमेशस्य विश्वसर्गनिरोधयोः ॥ हिरण्यगर्भः शर्वश्च कालस्यारूपिणस्तव ॥ १० ॥ गायंतिते
विशदकर्म [illegible] गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणं च ॥ गोप्यश्च कुंजरपतेर्जनकात्म
जायाः पित्रोश्च लब्धशरणा मुनयो वयं च ॥ १० ॥

रासंधभूतानां राज्ञां देव्यः पत्न्यः ते विशदं कर्म स्वगृहेषु बालकलालनादौ गायंति किं तत्कर्म स्व
शत्रोः जरासंधस्य वधं आत्मनां पत्नीनां विमोक्षणं च वत्सम्यगरोदीः श्रीकृष्णः एवं करिष्यतीति ॥ अत्र
दृष्टांतः गोप्यश्चेत्यादि ॥ यथा गोप्यः ॥ शंखचूडवधं स्वमोक्षं च गायंति ॥ अवतारांतरगतं च कुंजरप
तेः नक्रग्राहात् जनकात्मजायाश्च रावणात् ॥ पित्रोश्च कंसगृहात् ॥ अत एवं भूतानां नो सोऽस्माकं कृपया त्वं
यानमेव [illegible] नेयमिति भावः किंच जरासंधेति ॥ १० ॥ ॥ राम ॥

राम०
७१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अच्युतं पर्यावद्रूयडवद्वाइतिवदन्नतिरद्वारस्य सायानाभृजयन्विति सूचितम् ११४

ते

भूयाद्योपेति ॥ भूयिष्ठं गोश्रयोनितः शिशुपालवधादयो विसृष्टाभवसा आभविष्यतीति भावः ततः सर्वं भवि
ष्यतीति संभावयेत्राह पर्यय इतिपच्यते इति पाकः कर्म तस्य विपाकः फलं तेन यत्तत्पुण्यविपाकेन जरा
संधादीनां च पापविपाकेन ॥ पाठांतरे जरासंधस्य पापविपाकेनेति नाधि चक्रुः ततः ताभिप्रेतः तत्र गते
नवि सर्वं भविष्यतीत्यर्थः ॥ ११ ॥ अनंता अप्यनंतासं प्रार्थ्य गरुडवृत्तदेवादीन् ॥ १२ ॥ अवरोधान् निर्गं

जरासंधवधः कृत्स्नभूयिष्ठायोपकल्पते ॥ प्रायः पाकविपाकेन तवचाभिमतः क्रतुः ॥ ११ ॥ श्री
शुक उवाच ॥ सुहृद्ववचो राजन्सर्वतोभद्रमच्युत ॥ देवर्षिर्यदु[illegible]स्य प्रत्यपूजय
न् ॥ १२ ॥ अथादिशत्प्रयाणाय [illegible] भगवान्देव
कीसुतः ॥ भृत्यान्दारुकजैत्रादीननुज्ञाप्य गुरून्विभुः ॥ १३ ॥ निर्गमय्यावरोधान्स्वान्ससुतान्स
परिच्छदान् ॥ संकर्षणमनुज्ञाप्य यदुराजं च शत्रुहन् ॥ १४ ॥ सूतोपनीतं स्वरथमारुह्य गरुडध्व
जः ॥ ततो रथद्विपभट सादिनायकैः ॥ करालया परिवृत आत्मसेनया ॥ मृदंगवेणु
पणवगोविषाणैः प्रघोषघोषितककुभो निराक्रमत् ॥ १५ ॥ ॥

मय्यप्रयाणं कारयित्वा ॥ १४ ॥ भटाः पदातयः सादिनः अश्वारोहाः रथादिनायकैः करालया तीव्र
या आत्मसेनया परिवृतो निराक्रमत निरगात् ॥ तः सकाशात् ॥ मृदंगादिभिर्वाद्यैः प्रघोषेण प्रक
र्षेण घोषेण घोषितयाः ककुभः स्वदा जीतति ॥ १५ ॥ समायनमः ॥ ॥ राम ॥ ॥ ॥

परिच्छदान्

मत्पुडुद्वषितायाः १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नरयानैरश्वैः कांचनशिविकाभिश्च अच्युतं पतिमनुययुः सुव्रताः पतिव्रताः वराणि उत्कृष्टानि अंबरादीनि
वस्त्रादीनि यासां ताः ॥ १८ ॥ नरोष्ट्रादिभिर्यानैः अश्वतरी गर्दभ्याम् अश्वाज्जाता अनः शकटं करेणुः गजी परिजन
योषितश्च ॥ कटः कुटयः उशीरादितृणनिर्मिता गृहाः कंबलाः वर्णकंबलाः अंबराणि वस्त्राणि इत्यादयः
उपस्कराः सामग्रीः कुट्यादिरूपाः यासां ताः अधियुज्य बलीवर्दादिषु तानुपस्करान् हेठ सत्राय ॥ १९ ॥

नरवाजिकांचनशिविकाभिरच्युतं सहात्मजाः पतिमनुसुव्रता ययुः ॥ वरांबराभरणविलेपन
स्रजः सुसंवृतान्नभिरसिचर्मपाणिभिः ॥ १८ ॥ नरोष्ट्रगोमहिषखराश्वतर्यनः [illegible]ः परिजन
वारयोषितः ॥ स्वलंकृताः कटकुटिकंबलांबराद्युपस्करान्ययुरधियुज्य सर्वतः ॥ १९ ॥ बलं बृह
द्ध्वजपटछत्रचामरैर्वरायुधाभरणकिरीटवर्मभिः ॥ दिवांशुभिस्तुमुलरवं बभौ यथा
र्णवः क्षुभिततिमिंगिलोर्मिभिः ॥ २० ॥ अथो मुनिर्यदुपतिना सभाजितः प्रणम्य तं हृदि विदध
द्विहायसा ॥ निशम्य तद्व्यवसितमाहृतार्हणो मुकुंदसंदर्शननिर्वृतेंद्रियः ॥ २१ ॥ राजदूत
मुवाचेदं भगवान्प्रीणयन्गिरा ॥ माभैष्ट दूत भद्रं वो घातयिष्यामि मागधम् ॥ २२ ॥ इत्युक्तः प्र
स्थितो दूतो यथावदवदन्नृपान् ॥ तेऽपि संदर्शनं शौरेः प्रत्यैक्षन्मुमुक्षवः ॥ २३ ॥

न्य

रवेरंशुभिश्च दिवा तद्बलं बभौ कथंभूतं तमुलरवं सुर्कुलस्वनं क्षुभितैः तिमिंगिलैः ऊर्मिभिः ॥ २० ॥ मु
निर्नारदः विहायसा आयया विनिर्ययौ ॥ २१ ॥ माभैष्टेति बद्धानां राज्ञां अभिप्रायेण ॥ २२ ॥ [illegible] प्रत्यैक्ष
न्त यद्यस्मात् मुमुक्षवः ॥ २३ ॥ श्रीरामचंद्राय नमः ॥ ॥ ॥ ॥ ॥

आर्जुनादयो मार्गदेशाः ॥ तीर्त्वातिक्रम्य विनशनं कुरुक्षेत्रमतीयाय अतिक्रमयत् ॥ २२ ॥ प्राक्प्रस्थमिंद्र
प्रस्थं ॥ २३ ॥ प्राणाः इंद्रियाणि प्राणं मुख्यप्राणमिव ॥ २५ ॥ सस्वजे परिरेभे ॥ २६ ॥ रमायाः [illegible] श्रमलं

स० २

आर्जुनं तु सो वीरमत्रं तीर्त्वा विनशनं हरिः ॥ गिरीन्नदीरतीयाय पुरग्रामव्रजाकरान् ॥ २२ ॥ ततो
दृषद्वतीं तीर्त्वा मुकुंदोऽथ सरस्वतीं ॥ पांचालानथ मत्स्यांश्च शक्रप्रस्थमथागमत् ॥ २३ ॥ तमुपा
गतमाकर्ण्य प्रीतो दुर्दर्शनं नृणाम् ॥ अजातशत्रुर्निरगात्सोपध्यायः सुहृद्वृतः ॥ २४ ॥ गीतवा
दित्रघोषेण ब्रह्मघोषेण भूयसा ॥ अभ्ययात्स हृषीकेशं प्राणाः प्राणमि वादृताः ॥ २५ ॥ दृ
ष्ट्वा विक्लिन्नहृदयः कृष्णस्नेहेन पांडवः ॥ चिराद्दृष्टप्रियतमं सस्वजे च पुनः पुनः ॥ २६ ॥ दोर्भ्यां
परिष्वज्य रमामलालयं मुकुंदगात्रं नरपतिर्हताशुभः ॥ लेभे परां निर्वृतिमश्रुलोचनो हृष्य
त्तनुर्विस्मृतलोकविभ्रमः ॥ २७ ॥ तं मातुलेयं परिरभ्य निर्वृतो भीमः स्मयन्प्रेमजलाकुलेंद्रियः
यमौ किरीटी च सुहृत्तमं मुदा प्रवृद्धबाष्पाः परिरेभिरेऽच्युतं ॥ २८ ॥ अर्जुनेन परिष्वक्तो यमाभ्यामभि
वादितः ॥ ब्राह्मणेभ्यो नमस्कृत्य वृद्धेभ्यश्च यथार्हतः ॥ २९ ॥ मानिनो मानयामास कुरुसृंज
यकैकयान् ॥ सूतमागधगंधर्वा वंदिनश्चोपमंत्रिणः ॥ ३० ॥ ॥

युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवंदनम्

नृ०

[illegible] श्रमालयं विस्मृतो लोकविभ्रमो लोकव्यवहारो येन सः ॥ २८ ॥ अर्जुनेन समत्वात्परिष्वक्त एव
केवलं पादौ नमस्कुर्वन् ॥ अर्जुनः श्रीकृष्णेन भुजाभ्यामाहृत इति भावः ॥ यमाभ्यां त्वभिवादितश्चेति ॥ २९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भा॰ह॰
उ॰ टी॰
७२

विचित्रध्वजादिभिर्विराजमानं ॥ ३१ ॥ प्रतिसद्म उद्दीप्तैः दीपैः बलिभिः पुष्पादिभिः प्रकारैश्च जालेभ्यो गवा-
क्षेभ्यो निर्गतैर्धूपैः रुचिरं विलसंत्यः पताकाः यस्मिन् मूर्धन्याः मूर्ध्नि भवाः हेमकलशानि येषां तैः रजत-
मयानि रूप्यमयानि स्थूलानि शृंगाणि कलशाधस्तनभूमिकाः येषां तैर्भवनैर्जुष्टं ॥ ३२ ॥ कुरुराजधाम

मृदंगशंखपटहवीणापणववेणुभिः ॥ ब्राह्मणाश्चारविंदाक्षं तत्र वृंदं नटनर्तका जगुः ॥ २९ ॥ एवं
सुहृद्भिः पर्यस्तः पुण्यश्लोकशिखामणिः ॥ संस्तूयमानो भगवान् विवेशालंकृतं परं ॥ ३० ॥ सं-
सिक्तवर्त्मकरिणां मदगंधतोयैः चित्रध्वजैः कनकतोरणपूर्णकुंभैः मृष्टात्मभिर्नवदुकू-
लविभूषणस्रग्गंधैर्नृभिर्युवतिभिश्च विराजमाने ॥ ३१ ॥ उद्दीप्तदीपबलिभिः प्रतिसद्मजाल-
निर्यातधूपरुचिरं विलसत्पताकं ॥ मूर्धन्यहेमकलशै रजतोरुशृंगैर्जुष्टं ददर्श भवनैः कु-
रुराजधाम ॥ ३२ ॥ प्राप्तं निशम्य नरलोचनपानपात्रमौत्सुक्यविश्लथितकेशदुकूलबंधाः
सद्यो विसृज्य गृहकर्म पतींश्च तल्पे द्रष्टुं ययुर्युवतयः स्म नरेंद्रमार्गे ॥ ३३ ॥ तस्मिन् सुसं-
कुलइभाश्वरथद्विपद्भिः कृष्णं सभार्यमुपलभ्य गृहाधिरूढाः ॥ नार्यो विकीर्य कुसुमैर्मनसो-
पगुह्य सुस्वागतं विदधुरुत्स्मयवीक्षितेन ॥ ३४ ॥

पुरंदरपुरी ॥ ३२ ॥ नराणां लोचनानि तेषां पानस्य आदरवीक्षणस्य पात्रं विषयं किं पुनर्नारीणामिती-
त्यर्थः ॥ ३३ ॥ उत्सुकस्वागतं तत्र आदिकं प्रियं तत्स्मयवीक्षितेनैव विदधुः ॥ ३४ ॥ राम ॥ राम॰
७२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उडुपर्हंसैःस्वैःसहचरास्त्रमभूमिःकिंपुरुषमकादि २६॥१

श्रीगव्यपवश्रीलोपजीविनांसंज्ञाः तेषुमन्त्र्याद्य २२ प्रभुपेतः प्रभिगमनेनमस्कृतः २५ ॥ सस्नुषाद्रौपदीसहि-
ता २७ ॥ सं प्रकारं प्रमोदेनोपहूतोभिभूतः ३४ गुरुस्त्रीणांच कृसयाद्रौपयाभगिन्यासुभद्रया ४१ श्रा

ऋत्वुःस्त्रियःपथिनिरीक्ष्यमकुंदपत्नीस्तारायथोडुपर्हंसैः किमेकार्यम्भूमिः ॥ यद्वृत्तवर्षपुरुषमौ
लिमंदावहामलीलावलोककलयोत्सवमातनोति ॥ २९ ॥ तत्रतत्रोपसंगम्यपौरामंगलपाणयः ॥
चकुःसपर्यांकृसायप्रश्रेणीमुख्याहतेनसः ३० ॥ स्रतःपुरजनैःप्रीतैर्मुकुंदःफुल्ललोचनैः ॥ स
संभ्रमैरभ्युपेतः प्राविशद्राजमंदिरं ३१ ॥ पृथ्याविलोक्यभ्रात्रेयंकृसंत्रिभवनेश्वरं ॥ प्रीतात्मोत्थाय
पर्यंकात्सस्नुषापरिषस्वजे ३२ ॥ गोविंदंगृहमानीयदेवदेवेशमादृतः ॥ पूजायांनाविदत्कृ
त्यंप्रमोदोपहृतोन्त्रपः ॥ ३३ ॥ पितृष्वसुर्गुरुस्त्रीणांकृसश्चक्रेभिवादनं ॥ स्वयंचकृष्णयाराजन्भ
गिन्याचाभिवंदितः ॥ ३४ ॥ स्वश्र्वासंचोदिताकृसाकृसपत्नीस्तुसर्वशः ॥ आनर्चरुक्मिणींसत्यां
भद्रांजांबवतींतथा ॥ ३५ ॥ कालिंदींमित्रविंदांचशैब्यांनाग्निजितींसतीं ॥ अन्याश्चाभ्यागतायाः
स्तुवासःस्रग्मंडनादिभिः ॥ ३६ ॥ सुखंनिवासयामासधर्मराजोजनार्दनं ॥ ससैन्यंसानुगामा
त्यंसभार्यंचनवंनवम् ॥ ३७ ॥ ॥ रामायनमः ॥ ॥

नर्वश्रर्थिनवती ४२ अन्याश्चयाः कृसपत्न्योऽभ्यागताः ताश्चपि ४३ प्रत्यहंनवंनवंयथाभवतितथाासुखं

श्री भा० द० टी० ७४

कथंभूतोयं : श्रीकृष्णः प्रेमार्द्रफाल्गुनेनसहितः ॥ अतएव तस्यसहायेनसतायेनाखांडवेनवह्निं तर्पयित्वा तत्रमयं
मयासुरं विषमकर्मणः पुत्रं मोचयित्वा तंमयं प्रयुज्य युधिष्ठिराय दिव्यां सभां कृता ॥ तंश्रीकृष्णं ॥ अनेनराज्ञः कृष्णोप
रानुस्मरणादि त्वात्मभावयथामनोरथसर्वावकाशसंपादनं चदर्शितं ॥ ४५ ॥ इति श्रीभावार्थदीपिकायामेकसप्ततितम :
ततो हिमप्रतितमे राज्ञाकार्यं निवेदिते ॥ इत्यं जयं मागधं बुद्ध्वाभीमेनघातयद्धरिः ॥ आस्थितं आसनं : इतिशेषः ॥ १ ॥ अथ

तर्पयित्वाखांडवेनवह्निं फाल्गुनसंयुतः ॥ मोचयित्वामयंयेनराज्ञे दिव्यासभाकृता ॥ ४५ ॥ उवास
कतिचिन्मासान्राजन्प्रियचिकीर्षया ॥ विहरन्रथमारुह्य फाल्गुनेनभटैर्वृतः ॥ ४६ ॥ इति श्रीभाग
वतेदशमस्कंधे श्रीकृष्णस्येंद्रप्रस्थानगमनंनामैकसप्ततितमोध्यायः ॥ ७१ ॥ श्रीशुकउवाच ॥ एक
दातुसभामध्यआस्थितोमुनिभिर्वृतः ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैर्भ्रातृभिश्चयुधिष्ठिरः ॥ [illegible] आचार्यैः
कुलवृद्धैश्च ज्ञातिसंबंधिबांधवैः ॥ शृण्वतामेवचैतेषामाभाष्येदमुवाच [illegible] युधिष्ठिरउवाच ॥ क
तुराजेनगोविंदराजसूयेनपावनीः ॥ यक्ष्ये विभूतीर्भवतः तत्संपादयनः प्रभो ॥ [illegible] त्वत्पादुकेअवि
रतंपरियेचरंतिध्यायंत्यभद्रनशनेशुचयोगृणंति ॥ विंदंतितेकमलनाभभवापवर्गमाशासतेय
दितआशिषईशनान्ये ॥ ४ ॥ ल सैव

नामेवेति ॥ यद्यपिसर्वः श्रीकृष्णः करोतिनततदन्यः कश्चिदपिकर्तुंसमर्थइतिनिश्चित्य सर्वांतानन्नाहृत्य
कृष्णमुवाचेत्यर्थः ॥ आभाष्य भोः भोः कृष्ण कृष्णभक्तवत्सल इत्येवं संबोध्य ॥ २ ॥ विभूतीः अंशान् एषुच
क्रवर्तिनोमनोरथाः कथं त्वयाक्रियतेइतिचेदत आहत्वत्पादकेइति ॥ ३ ॥ परियेचरंतीति ॥ यद्वा
वधानमार्गपरिचरंतिदेहेनध्यायंतिमनसा अभद्रस्यनशनेनाशके गृणंतिच ॥ तेभवस्यापवर्गंमोक्षं विं
दंतियद्याशासतेतर्हि आशिषोपितएवविंदंति नान्येचक्रवर्तिनोपि ॥ ४ ॥ राम ॥

क्री २१

राम ७४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मा

भगवतो भक्तपक्षपातं विशुद्धं वक्तुमाह ॥ तदेवदेवेति तत्तस्मात् पश्यतु साक्षाद्देवं निःश्रितेष्वपि कर्मादिप्रधानाः के
वित कुरुसंजयाः श्रीभगवद्भक्तिं न बहुमन्यंते तेषां मोहनिवृत्तये ये त्वां भजंति तमादिवानभजंति ॥ तेषामुभ
येषां निष्ठां स्थितिं प्रदर्शय ॥ ननु रागादिरहिते मयि कथमिदं वैषम्यं स्यादत आह नेति ॥ ५ ॥ स्वः स्वकीयः
परस्तु भिन्न इति भेदमतिः न तव स्याद्देवस्तु अतः ब्रह्मणो निरुपाधेः ॥ किंच सर्वस्यात्मनः अतः समदृशः किंच स्वस्य
नुभूतेः अतो रागाद्यभावादिति भावः ॥ तथापि सेवमानानामेव तत्प्रसादो नान्येषां ॥ तत्र सेवानुरूपम

तद्देवदेवभवतश्चरणारविंदसेवानुभावमिह पश्यतु सर्वलोकः ॥ ये त्वां भजंति न भजंत्युत
वोभयेषां निष्ठां प्रदर्शय विभो कुरुसंजयानां ॥ ५ ॥ न ब्रह्मणः स्वपरभेदमतिः तव स्यात् सर्वा
त्मनः समदृशः स्वसुखानुभूतेः ॥ संसेवतां सुरतरोरिव ते प्रसादः [illegible] दयो वि
पर्ययोत्र ॥ ६ ॥ श्रीभगवानुवाच ॥ सम्यक् व्यवसितं राजन्भवता शत्रुकर्शन ॥ कल्याणी
येन ते कीर्तिर्लोकाननुभविष्यति ॥ ॥ ७ ॥ ॥ रामायनमः ॥

दयः फलं न तत्र विपर्ययो अन्यथाभावः ॥ यथा कल्पद्रुमस्य रागादिराहित्येपि सेवकेष्वेव फलजनकत्वं
तद्वत् ॥ ६ ॥ शत्रुकर्शनेति सं
बोधयन् ॥ सर्वराजविजयशक्तिं संचारयति ॥ अनुभविष्यति व्याप्स्यति सर्वलोकव्यापिनी भविष्यतीत्यर्थः
किमत्र मयान्येन वा संपादनीयं न वस्तु करणं राजसूय इत्याह ॥ ॥ ७ ॥ ॥ रामायनमः ॥ ॥

श्री·
भा·द·
उ·टी·
७५

नृपतीन्सर्वान्सर्वान्संभारान् ॥ एतोपस्करान् संभृत्य संपाद्य आहर स्व अनुतिष्ठेत्यर्थः ॥ ननु नृपतिविजयादिक
थं शक्यं स्यात् ॥ अत आह एत इति ॥ ९ ॥ किं चात्मवता जितेंद्रियेण तेत्वया हं च जितो स्मि वशीकृतो सि ॥ अजि
तात्मभिः अजितेंद्रियैः अप्राप्तत्तावत् ॥ एवंभूतस्य तव परैः परिभवशंका अकिंचनमपि नाभिभवितुं मन्युरंकोपि

ऋषीणां पितृदेवानां सुहृदामपि नः प्रभो ॥ सर्वेषामपि [illegible] भूतानामीप्सितः क्रतुराडयं ॥ प
विजित्य नृपतीन्सर्वान् कृत्वा च जगतीं वशे ॥ संभृत्य सर्वसंभारानाहरस्व महाक्रतुम् ॥ ९ ॥
एते ते भ्रातरो राजंल्लोकपालांशसंभवाः ॥ जितो स्म्यात्मवता ते हं दुर्जयो यो जितात्मभिः ॥ १० ॥
न कश्चिन्मत्परं लोके तेजसा यशसा श्रिया ॥ विभूतिभिर्वाभिभवेद्देवो पि किमु पार्थिवः ॥
श्रीशुक उवाच ॥ निशम्य भगवद्गीतं प्रीतः फुल्लमुखांबुजः ॥ भ्रातॄन्[illegible]युंक्त विष्णु
तेजोपबृंहितान् ॥ १२ ॥ सहदेवं दक्षिणस्यामादिशत्सह संजयैः ॥ दिशि प्रतीच्यां नकुलमुदी
च्यां सव्यसाचिनम् ॥ १३ ॥ प्राच्यां वृकोदरं मत्स्यैः केकयैः सह मद्रकैः ॥ ते विजित्य नृपान्वीरा
आजह्रुर्दिग्भ्य ओजसा ॥ अजातशत्रवे भूरि द्रविणं नृप यक्ष्यते ॥ १४ ॥

प्रभवतीत्याह ॥ न कश्चिदिति ॥ १० ॥ तेजसा प्रभावेण विभूतिभिः सैन्यादिसामग्रीभिः ॥ ११ ॥ अयुंक्त
नियुक्तवान् ॥ विष्णोस्तेजसा उपबृंहितान् ॥ तेजोपबृंहितानिति संधिरार्षः ॥ १२ ॥ कथंभूताय यक्ष्य
माणाय यक्ष्यते यागं करिष्यते ॥ ॥ १४ ॥ ॥ रामायनमः ॥ ॥ ॥ राम·
७५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

जन्मशाकल्यं यद्रूपं स्मृतिः पुनः शाकलीभावः तेच विद्वान् जानन् ॥ जरानाम राक्षसी तत्कृतं अचिंतयत् ॥
कथमसौ शाकलीभवेदिति ॥ ४१ ॥ विटपं शाखां वा करेण गृहीत्वा हरिः भीमस्य यथा हे विटपं पाटय ॥ भ्रा
ष्ट्राव्यमेनं विपाटयेति संज्ञया संकेतेन अरिवधोपायं दर्शयामासेत्यर्थः ॥ ४२ ॥ एकैकः पादादिः य
योस्ते शाकले ॥ ४५ ॥ उच्चैर्हतत्वाद्दसीहतः ॥ नराज्याभिलाषेण ॥ तिदर्शयन्नाह ॥ सहदेवमिति ॥ ४७ ॥ १

शाखोर्जन्ममृतीविद्वान् जीवितं जरया कृतं ॥ पार्थं प्राप्यायन्सत्त्वेन ज्ञेजसाचिंतयद्धरिः ॥ ४१ ॥
संचिंत्यारिवधोपायं भीमस्यामोघदर्शनः ॥ दर्शयामास विटपं पाटयन्निव संज्ञया ॥ ४२ ॥ तद्
द्विज्ञाय महासत्त्वो भीमः प्रहरतां वरः ॥ गृहीत्वा पादयोः शत्रुं पातयामास भूतले ॥ ४३ ॥ ए
कं पादं पदाक्रम्य दोर्भ्यामन्यं प्रगृह्य सः ॥ गुदतः पाटयामास शाखामिव महागजः ॥ ४४ ॥
एकपादोरुवृषणकटिपृष्ठस्तनांसके ॥ एकबाह्वक्षिभ्रूकर्णे शकले ददृशुः प्रजाः ॥ ४५ ॥
हाहाकारो महानासीन्निहते मगधेश्वरे ॥ पूजयामासतुर्भीमं परिरभ्य जयाच्युतौ ॥ ४६ ॥
सहदेवं तत्तनयं भगवान् भूतभावनः ॥ अभ्यषिंचदमेयात्मा मगधानां पतिं प्रभुः ॥ ४७ ॥
मोचयामास राजन्यान् संरुद्धान्मागधेन ये ॥ ४८ ॥ इति श्रीभागवते दशमे द्विसप्ततित
मोध्यायः ॥ ७२ ॥

इति श्रीभावार्थे दशमे द्विसप्ततितमोध्यायः ॥ ७२ ॥ ततः त्रिसप्ततितमे मोचयित्वान्नृपान्हरिः ॥ राजा
हूंभागे चान्दे प्राप्य स्यामपुनरागमत् ॥ अस्तुन्हृज्जरासंधवधान्मुद्धभूपतीन् ॥ विमोक्षन्नृपं
ध्याकस्मान्निजरूपमदर्शयत् ॥ ॥ रामजये ॥ ॥

परिरभ्य स्तुकृसेन विरजो भ द्वकोदरः ॥ स्वस्थः स्तुवी निर्व्रण आवलवीर्यसमन्वितः ॥ मह॰ २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा० द०
टी०
७८

निर्जिताः जरासंधेन निरुद्धा ये गिरिद्रोण्यां ॥ तेन ततो निर्गताः संतो दर्शनस्पर्शन श्रीकृष्णसंदर्शन परित्याग रेण
तयः ह्रस्वत्वामाः कृशाः संरोधन परिकर्शिताः ॥ २ ॥ भ्राजद्भ्राजमानैर्वरमणिः कौस्तुभोयया सा ग्रीवा
यस्य तं निवीतं कंठ वलंबितया मालया ॥ ५ ॥ पिबंत इव नेत्रादिना हृदेः पादयोः प्रणोम्य विरहिणे णालयः देहि

श्रीशुक उवाच ॥ अयुते द्वे शतान्यष्टौ लीलया युधि निर्जिताः ॥ ये निर्गता गिरिद्रोण्यां मलि
नामलवाससः ॥ १ ॥ ह्रस्वत्वामाः शुष्कवदनाः संरोधपरिकर्शिताः ॥ ददृशुः ते घनश्यामं
पीतकौशेयवाससं ॥ २ ॥ श्रीवत्सांकं चतुर्बाहुं पद्मगर्भारुणेक्षणं ॥ चारुप्रसन्नवदनं स्फु
रन्मकरकुंडलं ॥ ३ ॥ पद्महस्तं गदाशंखरथांगैरुपलक्षितं ॥ किरीटहारकटककटिसूत्रा
गदाचितम् ॥ ४ ॥ भ्राजद्वरमणिग्रीवं निवीतं वनमालया ॥ पिबंत इव चक्षुर्भ्यां लिहंत इव
जिह्वया ॥ ५ ॥ जिघ्रंत इव नासाभ्यां रंभंत इव बाहुभिः ॥ ६ ॥ प्रणेमुर्हतपाप्मानो मूर्धभिः पा
दयोर्हरेः ॥ कृष्णसंदर्शनाह्लादध्वस्तसंरोधनक्लमाः ॥ ७ ॥ प्रशशंसुर्हृषीकेशं गीर्भिः
प्रांजलयो नृपाः ॥ ७ ॥ राजान ऊचुः ॥ नमस्ते देवदेवेश प्रपन्नार्तिहराव्यय ॥ प्रपन्नान्पा
हि नः कृष्ण निर्विण्णान्घोरसंसृतेः ॥ ८ ॥

नः परिरंभमाना इव ॥ ६ ॥ श्री कृष्णसंदर्शनाह्लादेन ध्वस्तः संरोधनक्लमो येषां ते ॥ ७ ॥ संरोधाद्बहुता
नस्मान्न वो राजाः संसृतेरपि पाहि मोचय न नु भवतो जरासंधात्त्स्या विष्टा इह न मवत्र च भोगसक्ता
स्तु कथं संसृते मोचनीयाः ॥ इत्याशंक्यमं प्रति निवर्यंन तया भूता इत्याऊचुर्नैनमित्यष्टभिः ॥ ८ ॥

राम
७८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आयोहरिः श्रीकृष्णः ॥१५॥ गृहेषु वर्तमानं समयाचिरन ॥ अयावंतरस्यार्थः ॥१६॥ नन्विदं काममूथामहे इति वि
प्रोषो निर्दिष्टपत्नी ॥ अन्ययायस्य कस्यचित् पुत्रादेर्वियोगोऽस्तुः सह ः सकथं देयः न वराजमेद्रनकिं सीदायदे
यं ॥ यत्राङ्गिद्व्यभ्यः कथं देयं तथा तिरस्यरत्नाभरणादि पुत्रादिकथमन्यस्मै देयं इति चेदत्राह ॥ किंदुर्म
र्षमित्यादि ॥ अत्र दृष्टांतत्वेनार्थांतरमाह ॥ किमकार्यमिति ॥ यथा असाधूनां अकार्यं नास्ति तथा ति

शु. त्वाजितं नरासंधं नृपतेर्ध्यायतो हरिः ॥ अद्रोपायं तमेवाङ्गंड उद्धवो यमुवाच ह ॥१५॥ भीमसे
नोऽर्जुनः कृष्णो ब्रह्मलिंगधरास्त्रयः ॥ जग्मुर्गिरिव्रजं तात बृहद्रथसुतो यतः ॥१६॥ ते गत्वाति
थिवेलायां गृहेषु गृहमेधिनं ॥ ब्रह्मण्यं समयाचेरन् राजन्या ब्रह्मलिंगिनः [illegible] राजन्विद्ध्यतिथी
न्प्राप्तानर्थिनो दूरमागतान् ॥ तन्नः प्रयच्छ भद्रं ते यद्वयं कामयामहे [illegible] ॥१८॥ किं दुर्मर्षं तितिक्षू
णां किमकार्यमसाधुभिः ॥ किं न देयं वदान्यानां कः परः समदर्शिनाम् ॥१९॥ योऽनित्येन श
रीरेण सतां गेयं यशो ध्रुवं ॥ नाचिनोति स्वयं कल्पः स वाच्यः शोच्य एव सः ॥२०॥ ॥ ॥

तितिक्षूणां दुर्मर्षं दुःसहं नास्ति ॥ वदान्यानां दातृणां अप्रदेयं नास्ति ॥ समदर्शिनां परस्वं नास्ति
अतः किं विशेषनिर्देशेनेत्यर्थः ॥ अनित्येन शरीरेण मृतकल्पा हि वन्याणाम् अपि न वेचनीया इत्याशयेनाह ॥
योऽनित्येनेति ॥२०॥ नाचिनोति न संपादयति स वाच्यः निंद्यः ॥ ॥ ॥१९॥ रामायनमः ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा॰ द॰
उ॰ टी॰
७९

विश्वामित्रस्यान्यएषः यद्दरिश्चंद्रोभार्यात्मजादिसर्वंविक्रीयस्वयंचंडालतांप्राप्तोपिप्रनिर्विण्णः सहायोध्या॰
वासिभिर्जनैः सहस्वर्गंगतः रंतिदेवः सकुटुंबः ॥ अष्टचत्वारिंशद्दिनानिअलब्धान्नोदकोपिकथंचिल्लब्धा॰
न्नोदकादिअतिथिभ्योदत्वाब्रह्मलोकंगतः उंछवृत्तिः मुद्गलः पक्षमासंसीदन्‌ऊढुंबोप्यतिथिभ्योदाने
नब्रह्मलोकंगतः ॥ शरणागतकपोतरक्षणायस्वमांसमपूपेनायदत्वाशिबिर्दिवंगतः ॥ वलिर्वामनवेष
धारिणेहरयेसर्वस्वंदत्वातमेवात्मसाच्चकारकपोतः वातिथयेव्याधायसकपोत्यासहात्ममांसंदत्वाविमा

हरिश्चंद्रोरंतिदेवउंछवृत्तिःशिबिर्बलिः व्याधःकपोतोवहवोध्रुवेणाध्रुवंगताः २० श्री
शुकउवाच सभैराकृतिभिस्तांस्तप्रकोष्ठैर्याहृतैरपि ॥ राजन्यबंधून्विज्ञायदृष्टपूर्वानचिंत
यत्‌ २१ राजन्यबंधवोह्येतेब्रह्मलिंगानिबिभ्रति ददामिभिक्षितंतेभ्यआत्मानमपिदुस्त्य
जम्‌ २२ बलेर्नुश्रूयतेकीर्तिर्विततादिक्ष्वकल्मषा ऐश्वर्याद्भ्रंशितस्यापिविप्रव्याजे
नविष्णुना ॥ २३ ॥ रामायनमः ॥

नेनदिवंगतः ॥ व्याधः तयोः सत्त्वंवीक्ष्यस्वयमतिनिर्विण्णः ॥ महाप्रस्थानेवनाग्निदग्धदेहः निष्क
ल्मषोदिवमारुरोह ॥ एवमन्येबहवोध्रुवेणशरीरेणाध्रुवंलोकंगताः प्राप्ता इति ॥ २० ॥ व्याहृतैः व्या॰
हृतैः किणांकितैः दृष्टपूर्वान्द्रौपदीस्वयंवरादिषु ॥ २१ ॥ इंद्रस्याश्रियंजिहीर्षताविष्णुव्याजेनविस्तृ॰
ताकीर्तिः नाश्रुपितस्यापिबलेः ॥ नन्वत्रहोनेतिपाठेनश्रूयतेकिंअपितश्रूयतइतिस्वाबतोश्रियमिति ॥ २३ ॥ श्रीः राम॰
७९

नेहता २

अग्रेणावार्यमाणोपि अनपवविभ्रूरयमितिजानन्नपि ॥२४॥ पतमानेनपततान्नश्वरदेहेनब्राह्मणार्थी
यविपुलंयशोनेहमानेन असंपादयताकोन्वर्थः नकोपीत्यर्थः ॥२५॥ इत्येवंनिश्चित्यप्राहहेविप्रा इति २६

श्रियंजिजीविषतेदस्यविष्णवेद्विजरूपिणे ॥ जानन्नपिमहींप्रादाद्धार्यमाणोपिदैत्यराट् ॥२४॥ जीव
ताब्राह्मणार्थायकोन्वर्थः क्षत्रबंधुना ॥ देहेनपतमानेननेहताविपुलंयशः ॥२५॥ इत्युदारम
तिः प्राहकृष्णार्जुनवृकोदरान् ॥ हेविप्राव्रियतांकामोददाम्यात्मशिरोपिवः ॥२६॥ श्रीभगवा
नुवाच ॥ युद्धंनोदेहिराजेंद्रद्वंद्वशोयदिमन्यसे ॥ युद्धार्थिनोवयंप्राप्ताराजन्यानान्नकांक्षिणः ॥२७॥
असौवृकोदरः पार्थः तस्यभ्रातार्जुनोह्ययं ॥ अनयोर्मातुलेयंमांकृष्णंजानीहितेरिपुं ॥२८॥ एव
मावेदितोराजाजहासोच्चैः समागधः ॥ आहचामर्षितोमंदायुद्धंतर्हिददामिवः ॥२९॥ नत्वया
भीरुणायोत्स्येयुधिविक्लवतेजसा ॥ मथुरांस्वपुरींत्यक्त्वासमुद्रंशरणंगतः ॥३०॥ अयंतुवय
सातुल्योनातिसत्त्वोनमेसमः ॥ अर्जुनोनभवेद्योद्धाभीमस्तुल्यबलोमम ॥३१॥ इत्युक्त्वाभी
मसेनायप्रदायमहतींगदाम् ॥ द्वितीयांस्वयमादायनिर्जगामपुराद्बहिः ॥३२॥ ॥ राम ॥

राजन्यानामेवप्रपंचयति ॥२६॥ यतोमद्भियासमुद्रंशरणंगतः ॥३०॥ वयसाप्यतुल्यः नातिसत्त्वः अ
नतिबलस्त्वत्वदेहेनमयासमः ॥ ततोर्जुनोयोद्धानभवेत् ॥ भीमस्तुभवेत् ॥ यतोममतुल्यबलः ॥३१॥
प्रदायदत्त्वेत्यर्थः ॥३२॥ ॥ श्रीरामजी ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा द पु टी ७७

समेत्य[...]लेयुद्धागरो ॥ ३३ ॥ मंडलानि गदायुद्धगतिभेदान् सव्यं दक्षिणं च यथा भवति तथा रंगिणोः
रंग[...]तयोः नटयोरिवेति निर्भयत्वेनोपमा ॥ ३४ ॥ चटचटेति गदयोः परस्पराघातशब्दानुकरणं व
ज्रस्य निष्पेषो घातः तत्सदृशः युध्यतोर्दंतिनोः दंताघातशब्द इव शुशुभे ॥ ३५ ॥ अंसकटद्यादीन्

ततः समेत्य तावेवं वीरौ संयुक्तौ वितरेतरौ ॥ जघ्नतुर्वज्रकल्पाभ्यां गदाभ्यां रणदुर्मदौ ॥ ३३ ॥ मंड
लानि विचित्राणि सव्यं दक्षिणमेव च ॥ चरतोः शुशुभे युद्धं नटयोरिव रंगिणोः ॥ ३४ ॥ ततश्च
टचटा शब्दो वज्रनिष्पेषसन्निभः ॥ गदयोः क्षिप्तयो राजन् दंतयोरिव दंतिनोः ॥ ३५ ॥ ते वै गदे भुज
जवेन निपात्यमाने अन्योन्यतोंसकटिपादकरोरुजत्रुं ॥ चूर्णीबभूवतुरुपेत्य यथार्कशा
खे संयुध्यतोर्द्विरदयोरिव दीप्तमन्व्योः ॥ ३६ ॥ इत्थं तयोः प्रहतयोर्गदयोर्नृवीरौ क्रुद्धौ स्वमुष्टिभिर
यःस्पर्शैरपिंष्टां ॥ शब्दस्तयोः प्रहरतोरिभयोरिवासीन्निर्घातवज्रपरुषस्तलताडनोत्थः ॥ ३७ ॥ २२
तयोरेवं प्रहरतोः समशिक्षाबलौजसोः ॥ निर्विशेषमभूद्युद्धमक्षीणजवयोर्नृप ॥ ३८ ॥ एवं
तयोर्महाराज युध्यतोः सप्तविंशतिः ॥ दिनानि निरगमंस्तत्र सुहृद्वन्निशि तिष्ठतोः ॥ ३९ ॥
एकदा मातुलेयं वै प्राह राजन् वृकोदरः ॥ न शक्तोहं जरासंधं निर्जेतुं युधि माधव ॥ ४० ॥ ॥

[...]दीप्तो मन्युः ययोस्तयोः ॥ अर्कशाखाभ्यां युध्यतोर्दंतिनोः ते यथा चूर्णीभवतः तद्वत् ॥ ३६ ॥ राम
अपिंष्टां चूर्णीचक्रतुः ॥ ३७ ॥ ॥ राम ॥ राम ७७

हेनाथवयमेनंनाः त्वसूयामः ॥ अ[illegible]त्वनुदोषदृष्ट्यानपप्रणामः ऊतरस्तत्राहुः ॥ अनुगृह्णातियस्मात् ॥
पुनःस्तेवव्यतिरेकेनोपपादयंतिराज्यैश्वर्यंति ॥ ९ ॥ राज्यैश्वर्याभ्यांमदः तेनोन्नद्धः उच्छृंखलः नित्याश्चचलाश्च
संपदोमन्यतेयद्दानिम्मु मत्ताः अचलाः शाश्वतीर्मन्यते ॥ किंचअवस्तुमदस्तुतयापश्यंतीत्याहुः ॥ मृग
रत्नामिति ॥ १० ॥ वैकारिकीसृष्ट्यादिविकारायत्नाअयुक्ताअविवेकिनः राज्ययोगवियोगयोरनर्थावहत्व

नैनंनाथानुसूयामोमागधमधुसूदन ॥ अनुग्रहोयद्भवतोराज्ञांराज्यच्युतिर्विभो ॥ ९ ॥ राज्यैश्व
र्यमदोन्नद्धोनश्रेयोविंदतेनृपः ॥ त्वन्मायामोहितोनित्यामन्यतेसंपदोचलाः ॥ १० ॥ मृगतृ
ष्णांयथाबालामन्यतेउदकाशयं ॥ एवंवैकारिकीमायामयुक्तावस्तुचक्षते ॥ ११ ॥ वयंपुरा
श्रीमदनष्टदृष्टयोजिगीषयास्याइतरेतरस्पृधः ॥ घ्नंतः प्रजाः स्वाअतिनिर्घृणाःप्रभोमृत्युं
पुरस्त्वाविगणय्यदुर्मदाः ॥ १२ ॥ तएवकृष्णाद्यगभीररंहसादुरंतवीर्येणविचालिताःश्रियः
कालेनतन्वाभवतोनुकंपयाविनष्टदर्पाःचरणौस्मरामते ॥ ॥ १३ ॥ ॥

मस्मास्वेवदृष्टमित्याहुः ॥ वयमितिद्वाभ्यां ॥ ११ ॥ श्रीमदेननष्टादृष्टिः येषांते ॥ अस्याः पृथिव्याः इतरेतर
स्पृधः परस्परंस्पर्धमानाः घ्नंतः पुरतः त्वामसंत्रस्यविगणय्यपुरायेदुर्मदावयं ॥ १२ ॥ हेकृष्णतएववयंर
अ[illegible]विनष्टदर्पास्तेचरणौस्मरामः स्मर्तुमाप्तास्महे कथंभूताः भवतः तन्वामूर्त्याकालेनश्रियोवि
चालिताः विक्षिप्ताः अतोराज्यच्युतिरेवभवदनुग्रहएवेत्यर्थः ॥ १३ ॥ ॥ ॥ राम ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अतएवअद्येशनोनतरांमृगतृष्णिकासदृशंराज्यंशश्वत्पततापतिक्षणंक्षीयमाणेनतथारुजांरोगाणांभुवाज
न्मभूमिभूतेनदेहेनोपासितव्यमेवनस्पृहयामहे॥ प्रेत्यपरलोकेचक्रियाफलंस्वर्गादिभोगंचोपासितव्यंनस्पृ
हयामहेकर्णप्रभूतंकर्णयोःरोचनंरुचिजनकंतत्रभ्रातस्यस्पर्धाद्यनपगमेनसुखाभावादित्यर्थः॥ यद्येवंस्पृ
ताहृयंतर्हिममचरणौस्मरततोनायासेनमुक्तिर्भविष्यतीतिकिमिदमपेक्ष्यतइतिचेदतआहुः तन्नइति॥१४॥

अद्येशनोराज्यंमृगतृष्णिरूपितंदेहेनशश्वत्पततारुजांभुवा॥ उपासितव्यंस्पृहयामहेविभोक्रि
याफलेप्रेत्यचकर्णरोचनम्॥१४॥ तन्नःसमादिशोपायंयेनतेचरणाब्जयोः॥ स्मृतिर्यथान
विरमेदपिसंसरतामिह॥१५॥ कृष्णायवासुदेवायहरयेपरमात्मने॥ प्रणतक्लेशनाशाय
गोविन्दायनमोनमः॥१६॥ श्रीशुकउवाच॥ संस्तूयमानोभगवान्राजभिर्मुक्तबंधनैः॥ ताना
हकरुणस्तातशरण्यःश्लक्ष्णयागिरा॥१७॥ श्रीभगवानुवाच॥ अद्यप्रभृतिवोभूपामय्या
त्मन्यखिलेश्वरे॥ सुदृढाजायतेभक्तिर्बाढमाशंसितंतथा॥१८॥ दिष्ट्याव्यवसितंभूपाभवन्तऋ
तभाषिणः॥ श्रियैश्वर्यमदोन्नाहंपश्यउन्मादकंनृणाम्॥१९॥

त्वच्चरणस्मृतिरपित्वत्प्रसादफलमेवेत्यर्थः॥१५॥ श्लक्ष्णयामंजुलयावाचा॥१७॥ यद्याभवद्भिराशं
सितंतथावाढंनिश्चितंवोभवतांमयिभक्तिर्जायतेजायतामित्यर्थः॥१८॥ हेभूपाःमद्भजनमेवकर्त
व्यमितिभवद्भिर्यद्व्यवसितंसंकल्पितंदिष्ट्याभवद्भिर्भद्रमनुष्ठितंसत्यमेवेत्याह॥ भवन्तइति॥ श्रीश्चऐश्वर्यं
चताभ्यांमदः तेनोन्नाहमुद्धतंधनैःस्वैराचारमित्यर्थः॥ पश्येपश्यामीतिनिदेवाह॥ हैहयइति॥१९॥॥

हैहयः कार्तवीर्यः चक्रवर्ती नरेश्वरः । पित्रः कामदेनुहरणात्परशुरामेण सपुत्रो हतः । नरकेषा दैवेद्रु-
हैहयः कार्तवीर्यः चक्रवर्ती नरेश्वरः । पितृः कामदेनुहरणात्परशुरामेण सपुत्रो हतः । नरकेषा दैवेद्रु-
तो ग्रामः उन्मत्तः शाची संगायत्रास्त्रणान्महर्षीन्नाशी विकार्यावाह्रयत् ॥ नरेवन्नास्त्रेण । ततो भूः
शितानकेषः प्रजगमनमवापदेवनोप्युन्मतो वास्त्रणान पीडियत्नेरेवन्नास्त्रेणाके हतेः केकाये
हितः रावणेराहनमेस्वरः सीतामभिलषन्श्रीरामचंद्रेण हतः । नरकोदैत्येश्वरोदितिकुंडलापह-

हैहयोनकेषोवेनोरावणेनरकोपरे ॥ श्रीमदाङ्केशिता स्यानाहेवदैत्यनरेश्वराः ॥ २
भवंत पतहिताय देहाप्युत्याय मनवत ॥ मांयजेनाथ ये ........प्रजाय सेवन ॥ २१ ॥
नवंतः प्रजानतन्नु रवेडः देवभवाभवौ ॥ प्राप्ने प्राप्तेवसेवेनोम ......विचारिष्यथ ॥ २२ ॥ उदा
सीताश्च देहादौ यान्मारामाधृतव्रताः ॥ मय्यावेश्यमनः सम्यक्कर्माणेतेव ........
श्रीशुकउवाच ॥ इत्यादिश्यन्नृपान्कृस्नो भगवान्भुवनेश्वरः ॥ तेषांन्यषुनकर्मषु ........
न१ यामजनकर्मणि ॥ २४ ॥ स यथा कारयामास सहदेवेन भायुत ॥ नरदेवा ........ भूषणैः
स्त्रग्विलेपनैः ॥ २५ ॥ भोजयित्वा वरान्नेन स्नस्नानान्नमलंकृतान् ॥ भोगस्वा विविधैर्दु-

.........शिताः ॥ २७ ॥ यथु त्याथ देहादिनदेनवाहितायथु
हरणात्मयेवहतः प्रपरे श्रीमदात्म्यानाङ्केशिताः ॥ २७ ॥ यथुत्याथ देहादिनदेनवाञ्छिताय थु
नाम्प्रमन्नारवताः ॥ २७ ॥ प्रजानेरत्नपुत्रादिमेतताः प्राप्तेसमृत्वेनसेवमानाः ॥ २२ ॥ सोवृत्सयास्त
स्तु ॥ २३ ॥ स्त्रियश्च तेषां मजनुकर्मणाश्रुम्यगस्नानादौन्यपुंक ॥ २८ ॥ स्नस्नानान्नस्यगलकृतो
भोगैश्च पुत्रका वराह्वेन भोजयितापुनः तेषां सपर्यां सहदेवेन कमयामास ॥ २९ ॥ ॥ ॥

९२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्रहाश्चंद्रादयो यथा १

श्री
भा॰ द॰
उ॰ टी॰
६०

ष्ठीलाप्यनेदर्पिता ॥ २७ ॥ जगदुः कृत्वः ॥ २८ ॥ एवं तु वप्रस्यमितु प्रसंबं ॥ २१ ॥ श्रोतेमरतेप्राप्तमनोरथो बभूव ॥
॥ २२ ॥ इति श्रीभावार्थदीपिकायां दशमस्कंधे त्रिसप्ततमोऽध्यायः ॥ ७३ ॥ वृत्तश्लोकाः सन्तिनसेराजसूयः
ते हृज्जिताप्तकुंदेन राज्ञा नो मृष्टकुंडलाः विरेजुर्मोचिताः क्लेशात् प्रावृडंते यथा ग्रहाः १

ग्रस्थान्सादस्नानारोप्य मणिकांचनभूषितान ॥ प्रीणायस्नातैर्वाक्यैः सदेशान्प्रययापयत ॥
॥ २७ ॥ त एवं मोचिताः कृच्छ्रात्कृष्णेन सुमहात्मना ययुस्तमेव ध्यायंतः कृतानि च जगत्पतेः ॥
॥ २८ ॥ जगदुः प्रकृतिभ्यस्तम हापुरुषचेष्टितं यथान्वशासद्भगवान्मया वा चक्रुस्तंद्रिताः ॥ २९ ॥ जरा- सं२
संधं घातयित्वा भीमसेनेन केशवः पार्थाभ्यां संयुतः प्रायात्सहदेवेन पूजितः ॥ ३० ॥ गत्वाते
खांडवप्रस्थं शंखान्दध्मुर्जितारयः हर्षयंतः स्वसुहृदो दुर्हृदां चासुखावहाः ॥ ३१ ॥ तच्छ्रुत्वा कृ
प्रीतमनस इंद्रप्रस्थनिवासिनः निशाम्य मागधं शांतं राजा वाप्तमनोरथः ॥ ३२ ॥ अभिवंद्याथ
राजानं भीमार्जुनजनार्दनाः सर्वमाश्रावयां चक्रुरात्मना यदनुष्ठितं ॥ ३३ ॥ निशम्य धर्म
राजस्तत्केशवेनानुकंपितं आनंदाश्रुकलां मुंचन्प्रेम्णा नोवाच किंचन ॥ ३४ ॥ इति श्री
भागवते दशमस्कंधे जरासंधवधोनाम त्रिसप्ततमोऽध्यायः ॥ ७३ ॥ ॥ ॥

कथ्यादिजैः प्रश्रयज्ञाप्रसंगेन वैद्यवाता दिवर्ण्यते ॥ राजसूयमुखे रुक्माजरासंधं तदनंतरं ॥ चैद्यंतदंते ॥ राम॰
ऊर्वं ते वीजे कलिमिवावपन ॥ ॥ राम ॥ ॥ ६०

कृष्णस्यानुभावमिति चकाराज्जरासंधस्य हननं विधायितं चानेत्यर्थः ॥ तदाह ये स्युरिति ॥ १ ॥ ये त्रैलोक्यस्यापि गुर
वः स्युः सनकादयः सर्वे लोकपालाश्च ते ईश शिरसैव तवानुशासनं वहंति दुर्लभं लब्ध्वेति भा ये नैव प्राप्तं लब्ध्वा
प्तिभावः वक्ष्यमाणेनेत्यर्थः ॥ २ ॥ स भवान्परमेश्वरः अस्माकमनुशासनं धत्ते तदत्यंतविडंबनं अनुरूपं
मनुकरणं स्वतेजोहानिप्रसंगादित्यर्थः ॥ अथवा तव परिपूर्णस्यात्तापना ताधारणाभ्यां न तेजोहानिवृ
द्धी यतः श्रीकृष्णकृपया संगच्छते इत्याह ॥ ३ ॥ समानासमानरहितस्य ब्रह्मणस्तवो भयमायापरमात्म
सर्व

श्रीशुक उवाच ॥ एवं युधिष्ठिरो राजा जरासंधवधं विभोः ॥ कृष्णस्य चानुभावं तं श्रुत्वा प्रीतस्तमब्र
युधिष्ठिर उवाच २ वीत ॥ १ ॥ ये स्युः त्रैलोक्यगुरवः सर्वे लोकमहेश्वराः ॥ वहंति दुर्लभं लब्ध्वा शिरसैवानुशासनं ॥ २ ॥
स भवानरविंदाक्षो दीनानामीशमानिनां ॥ धत्तेनुशासनं भूमंस्तदत्यंतविडंबनं ॥ ३ ॥ न ह्येक
स्याद्वितीयस्य ब्रह्मणः परमात्मनः ॥ कर्मभिर्वर्धते तेजो ह्रसते च यथा रवेः ॥ ४ ॥ न वै तेजित
भक्तानां ममाहमिति माधव ॥ त्वं तवेति च नानाधीः पशूनामिव वैकृता ॥ ५ ॥ ॥

न इति सर्वजीवनियंतस्तव नियम्यत्वं सुतरां न वास्तवं अतः परानुग्रहार्थैरेतैः कर्मभिरित्यर्थः ॥ तथा
च श्रुतिः न कर्मणा वर्धते नो कनीयानिति ॥ नन्वेवमप्यहं परमेश्वरः ॥ ममेदं नीचं कर्मायोग्यमिति मं
नसि वैषम्यं न भवेदत आह ॥ न वै त इति ॥ ४ ॥ हे अजित तेनैव भक्तानामेव तावद्द्वितीयं नानाधीः भेदमतिर्ना
स्ति यथा पशूनामस्ति तां नो वैकृता शारीरविषया न तव तु नास्तीति किं पुनर्वक्तव्यमित्यर्थः ॥ ५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग॰
दु॰टी॰
८१

यज्ञिये यज्ञोचिते वसंतादिकाले युक्तान् अभियुक्तान् स युधिष्ठिरः ऋत्विजो होत्रप्रमुखान् वव्रे तानाह द्वैपा
यन इत्यादिभिः ॥ ६ ॥ अथर्वाकृतव्रणांतानेतान् वव्रे ॥ ऋत्विगुपद्रष्टृत्वादिभेदेन ॥ ९ ॥ अन्ये चोपहूताः ॥ यत्र दि
दृक्षवः तेन तत्रेयुरित्यर्थः ॥ ११ ॥ देवयजनं यज्ञभूमिं कृष्ट्वा कर्षणादिभिः संशोध्य दीक्षयां च ॥ चक्रिरे दी

श्रीशुक उवाच ॥ इत्युक्त्वा यज्ञिये काले वव्रे युक्तान्स ऋत्विजः ॥ कृष्णानुमोदितः पार्थो ब्रा
ह्मणान् ब्रह्मवादिनः ॥ ६ ॥ द्वैपायनो भरद्वाजः सुमंतुर्गोतमोऽसितः ॥ वसिष्ठश्च्यवनः कण्वो मै
त्रेयः कवषस्त्रितः ॥ ७ ॥ विश्वामित्रो वामदेवः सुमतिर्जैमिनिः क्रतुः ॥ पैलः पराशरो गर्गो वैशंपा
यन एव च ॥ ८ ॥ अथर्वा कश्यपो धौम्यो रामो भार्गव आसुरिः ॥ वीतिहोत्रो मधुच्छंदा वीरसेनोऽकृ
तव्रणः ॥ ९ ॥ उपहूतास्तथा चान्ये द्रोणभीष्मकृपादयः ॥ धृतराष्ट्रः सहसुतो विदुरश्च महा
मतिः ॥ १० ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा यत्र दिदृक्षवः ॥ तत्रेयुः सर्वराजानो राज्ञां प्रकृत
यो नृप ॥ ११ ॥ ततस्ते देवयजनं ब्राह्मणाः स्वर्णलांगलैः ॥ कृष्ट्वा तत्र यथाम्नायं दीक्षयां चक्रि
रे नृपं ॥ १२ ॥ हैमाः किलोपकरणा वरुणस्य यथा पुरा ॥ इंद्रादयो लोकपाला विरिंचिभवसंयु
ताः ॥ १३ ॥ सगणाः सिद्धगंधर्वा विद्याधरमहोरगाः ॥ मुनयो यक्षरक्षांसि खगकिन्नरचारणाः
॥ १४ ॥

क्षासंस्कारमकुर्वन् ॥ १२ ॥ उपकरणा उपस्कारा वरुणस्य राजसूये यथा आसन्निति शेषः ॥ किंच इं
द्रादय इति च ॥ १३ ॥ रामायनमः ॥ ॥ राम ॥ ॥ ॥ राम ॥ ॥

राम॰
८१

येऽर्कचंद्रादयो देवगणा ये च राजादयः समाहृताः नैते तत्र समीयुः स्म ॥ ११ नेमे वै सभकस्य पांडुसूनस्य रा
ज्ञः राजसूयसमविस्मिताः सन्तः सूयपत्नं सुसंपन्नं मे निरैक्षुत्वनयः ॥ १५ यज्ञकाश्च वेजनः ॥ १६ ॥
सूनैरंतु निःसीमामभिषवदिने ॥ २१ ॥ अथ्याहृण मग्र प्रजातस्याहं योगेष्वनेकोऽर्चति योगपानो वक्रनैने

राजानं सुसमाहूता राजयत्नस्य सर्वेशः ॥ राजसूयं समीयुः स्मरात्मः पांडुसूनस्य वै ॥ १५ ॥
मेमिनी कु सभकस्य सूयपत्नं न विस्मिताः ॥ १५ ॥ अथाजयन्महाराजं पांडकादेववर्चसः
राजसूयेन विधिवत्प्रायेन समिवामराः ॥ १६ ॥ सूनैरन्यं तत्री पालो यज्ञिकान्कदक्षस्यतीन
अपूज यजहभागान्यथावत्समाहितः ॥ १७ सदयांग्राहणा ये वै विस्मये नः सभास
दः नाग्रजयन्नेकांतात्मा हृदे वसदा ब्रवीत ॥ १८ ॥ अग्राहे न्यक्तनः श्रेष्ठं भगवान्का
लतोपतिः एते वै देवताः सर्वा देवाः कालयनादयः ॥ १९ ॥ यदात्मकमिदं विश्वं कैव
ल्यदात्मकाः ॥ अथि राज्ञ तेगोमेत्रां सांख्ययोग व्ययपराः ॥ २० ॥ ॥ ॥ न

रामायनमः ॥

कस्यां निष्ठया ॥ १८ ॥ सांख्ये ज्ञाने योगे उपासना ॥ ननु सांख्ये केवलपरं योगः सविशेषेण
परः कथमनयोरेकपरत्वेन ग्राह्यकइति ॥ ३० ॥ रम ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा॰ द॰ उ॰ टी॰ ८२

एक एवाद्वितीयोसावतः सा[illegible]स्यानन्यत्वमनुक्तं ॥ विशेषणभूतस्य च सर्वप्रपंचस्यानन्यत्वमाहास्य वि
शेषणविशेष्ययोरैक्यस्यापि ॥ उक्तेऽद्वितीयपदं उपपादयत्यैतदात्म्यमिति ॥ एष श्रीकृष्णः आत्मा य
स्य तत् एतदात्मं तस्य भावः ऐतदात्म्यं ॥ भावितमेवभावयति [illegible]देशाः ऐतदात्म्यमिदं सर्वमिति श्रुतेः
अत्र हेतुः आत्मैवेति हे सभ्याः आत्माश्रयः अन्यनिरपेक्षः स्वयमज इदं जगत् सृजति अवति हन्ति
वि५ चेति ॥ किंच विधानीति ॥ २१ ॥ यस्यावेक्षयानुग्रहेण विविधानि कर्माणि तपोयागादीनि जनय

एक एवाद्वितीयोसावैतदात्म्यमिदं जगत् ॥ आत्मनात्माश्रयः सभ्याः सृजत्यवति हंत्यजः ॥२०॥ विवि
धानीह कर्माणि जनयन्यदवेक्षया ॥ ईहते यदयं सर्वः श्रेयो धर्मादिलक्षणं ॥२१॥ तस्मात्कृ
ष्णाय महते दीयतां परमार्हणं ॥२२॥ सर्वभूतात्मभूताय कृष्णायानन्यदर्शिने ॥ देयं शान्ता
य पूर्णाय दत्तस्यानन्त्यमिच्छता ॥२३॥ इत्युक्त्वा सहदेवोभूत्तूष्णीं कृष्णानुभाववित् तच्छ्रु
त्वा तुष्टुवुः सर्वे साधु साध्विति वादिनः ॥२४॥ श्रुत्वा द्विजेरितं राजा ज्ञात्वा हार्दं सभासदां
समर्हयद्धृषीके[illegible] प्रीतः प्रणयविह्वलः ॥२५॥ तत्पादाववनिज्यापः शिरसा लोकपावनीः
सभार्यः सानुजामात्यः सकुटुंबो वहन्मुदा ॥२६॥

एवं चेत्सर्वभूतानां आत्मनश्चार्हणं भवेत् २२

ऊर्ध्वं च ॥ यद्वशादयं सर्वोपि जनो ॥ धर्मादिलक्षणं श्रेयः ईहते साधयति कर्माणि तत्फलानि च य
दधीनानीत्यर्थः ॥२१॥ आत्मना क्रियमाणमर्हणमात्मनः कथं भवेत्तत्राह ॥२२॥ सर्वभूतात्मभूताय अ
नन्यदर्शिने निरस्तभेदमतये ॥२३॥ श्रीकृष्णस्यानुभाववित् ॥ सहदेव इत्युक्त्वा तूष्णीमभूत् ॥२४॥ द्विजे
रितं साधु साध्विति घोषं श्रुत्वा हार्दं हृदि भवं अभिप्रायं ॥२५॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

देसर्वं सदसस्यतयः बालस्य भाषिते मा मस्य मा जानीत मा गृह्णीतेति किं तत्रयपतः ॥ कस्सोऽहं तोम्सम न स्मात ॥ २१ ॥ असौ च बालवीर्यः सर्वं वडन्नेय गोपालश्शितिदर्पाथिव्यादिपालकइत्यर्थः ॥ ऊर्क्तीनवे विपरीते लपतीति ऊलपाः नाने मतेह्यानपतीनिति याम ॥ अकाक कं चाग्रकं च काकं तेन विपेतेप स्पसः अकाकश्चासकामश्चत्यर्थः सम्यगाम्राम्नकामो योग्यकेवलपुरोडाशमात्रं नार्हतीति ॥ अपितम्सर्वं ८२
देव
सुखदुःखे ३

वासो ऽभिः पीतकौशेयैर्भूषणैश्च महाधनैः ॥ अर्हयीवास्त्वद्भूर्णा तो नाश कस्समवोहिते
२७ इत्यं समाभितिं वीदृग्य सर्वे प्रांजलयो जनाः ॥ नमो जायेतिने सत्तांनि पेतद्भृष्यहृष्टयः ॥ २८
इत्येतन्निशाम्य दम्भो घसनः स्वपीवादुत्थायक्रस्सगणवर्णानजातमन्युः ॥ आहिप्यवाकुमिदं
माह सदस्यमर्षीमश्राबयन्भगवते परुषाण्यभीतः ॥ २९ ॥ ईशोऽदरन्ययः कालइतिसत्यवती
श्रुतिः ॥ वृद्धानामपि सदुद्धिर्बालवाक्यैर्विभिद्यते ॥ ३० ॥ यूयं पात्रविदांश्रेष्ठा मासमध्वं बाल
भाषिते ॥ सदसस्पतयः सर्वे कृष्णो यत्सं मतोऽर्हणे ॥ ३१ ॥ तपोविद्याव्रतधरान्ज्ञानविध्वस्त
कल्मषान् ॥ परमर्षीन्ज्ञाननिष्ठाल्लोकपालांश्च पूजितान् ॥ सदसस्पतीनतिक्रम्य गोपा
लः कुलपांसनः ॥ यथा काकः पुरोडाशं सपर्यां कथमर्हति ॥ ३२ ॥ ॥ ॥ ॥ ॥

मात्वं
त्समर्पितयायेश्रीकृष्णो ऽपि च स्तर्षियोग्यां सपर्यां कथमर्हतीति ॥ किं त्वात्मसमर्पणमर्हतीत्यर्थः ॥ ३२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा॰ दे॰
उ॰ टी॰
८३

वर्णाश्रमकुलेभ्यो भ्रष्ट नः श्वसमानात्मनामगोत्रमितिश्रुतेः॥ अत एवानधिकारित्वान्सर्वधर्मबहि-
ष्कृतः सैरंध्रीमात्रात्स्वरमेष्वरत्वात्॥ अत एव निर्गुणः नमः आदिरहितः एवंभूतो जीवात्मा यो यतस्तं
सपर्यामात्रं कथमर्हतीत्यर्थः अपि च॥ २४॥ कथं वर्णनीयो महदैश्वर्ये पुरुषो नाम महिमा यस्मादेषो कुले
पयाति नाशाभ्रमपि॥ किं स्म द्विर्वहिष्कृतमपि तत् शरसाधूतो किं यस्मात् दारिकुलवंशिकृद्ययापानर
तेऽपि निरतिशयाचारमित्यर्थः॥ अहोऽयह्नामैव नावद्रीह्शमाहात्म्यं यद्दैते कुलहद्रस्य ययानेः न्न्पट २
प्राप्नोतन प्राप्नुदित्यादि॥ अथ तमाहात्म्यादोस्वरः अतः सपर्यामात्रं कथमर्हतीत्यर्थः॥ किंच ये राजनोऽत्र
२५॥

पूं

वर्णाश्रमकुलाचारैः सर्वधर्मबहिष्कृतः॥ सैरंध्रीगणोऽर्ही नः सपर्यां कथमर्हति॥ २४॥ यया
तिनेषां हि कुलं धर्मेर्बहिष्कृते॥ ह्ययापानरतेशास्तस्सपर्यां कथमर्हति॥ २५॥ ब्रह्मर्षिभि-
र्विनान्देशान्निर्वैते ब्रह्मवर्चसं॥ समन्दंडं गमाश्रित्य बाधंते दस्यवः प्रजाः॥ २६॥ ॥ ॥

नेच्छादयंति नेतद्दर्थं कीटकादिदेशावर्ण्यं यंति॥ एते ब्रह्मर्षिभिर्विनान्देशानेवाश्रयं ब्रह्मवर्च-
से समन्दंडं गमपि हित्वा ह्रापयित्वेत्यर्थः बाधंते न यायाः दस्यवः प्रजाः ताः॥ अयमर्थः॥ ब्रह्मवेदः तद-
र्थाभियोगा ब्रह्मवर्चसं तद्विरुद्धमब्रह्मवर्चसं॥ मदाश्रमलिंगं तत्सहितेलिंगं समन्दं वेदविरुद्धलिं-
गधारिणां यावद्दंडमित्यर्थः॥ तन्नामलिंगं त्याजयित्वा बाधंते दंडयंति॥ कथंभूते दुर्गं धर्मवत्मनीतेरधर्म
न गडुभेयमित्यर्थः॥ तथा रसस्तमपि प्रजावेशेन वर्तमाना दंडयंति॥ अतो यदुभ्यो न्यः को नाम धार्- राम
मिको स्तीति॥ २६॥ पारुष्यं न त्रानापमेव २९ ॥ ॥ ८३

शिवापेकः तस्याकृतं श्रुत्वा ॥ यथा सिंहो न किंचिद्व्रतेन हतः ॥३६॥ तावद्गुल्यायेतस्याय मभिप्रायः एवमत्या
येनैव मतस्त्वबलः सर्वोनेनात्र हन्यात ॥ यतोमयैवष्टी ॥ कुंदंतव्यइतितत्तणमेवास्यायशिरोनहारेति ॥
४४ ॥ ननैवं निंदकस्य कथं वासुदेवप्रवेशः ॥ तत्राह जन्मत्रयेति ॥ ४४ ॥ जन्मत्रयेत्नुगणितं अनुवर्तितं ॥

एवमादीन्यसह्याणि बभाषेनृपमंगलः ॥ नोवाच किंचिद्भगवान्यथा सिंहः शिवाकृते ॥ ३७ ॥ भ
गवान्निंदितं श्रुत्वा तु ॥ सदंतत्सभामदः ॥ कर्णौपिधायनिर्जग्मुः शापेतः चेदिपंरुषा ॥ ३८ ॥ नि
दांभगवतः श्रृण्वन्ननवरस्यजनस्य वा ॥ ततोनापैति यः सोपियात्यधः सुकृताच्युतः ॥ ३९ ॥
ततः पांडुसुताः क्रुद्धा मत्स्यकेकयसृंजयाः ॥ उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ॥ ४० ॥
ततः चैद्यस्तु संभ्रांतो न्यगृह्णात्खड्गचर्मणी ॥ भर्त्सयन्कृष्णपक्षीयान्राज्ञः सदसि भारत ॥ ४१ ॥
तावदुत्थाय भगवान्स्वाञ्निवार्य स्वयं रुषा ॥ शिरः क्षुरांतचक्रेण जहारापततो रिपोः ॥ ४२ ॥
शब्दः कोलाहलोथासीच्छिशुपाले हते महान ॥ तस्यानुयायिनो भूपा दुद्रुवुर्जीवितैषिणः
चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपाविशत ॥ पश्यतां सर्वभूतानामुल्केव भुविखाच्च्युता
४४ ॥ जन्मत्रयानुगुणितवैरसंरब्धया धिया ॥ ध्यायंस्तन्मयतां यातो भावो हि भवकारणं
॥ ४५ ॥

यद्वैरं तेन संरब्धया धिया ध्यायंस्तन्मयतां तत्स्वरूपतां यातः ॥ पार्षदोबभूवेत्यर्थः ॥ अत्र हेतुः ॥ भावो हीत्यादि
भावज्ञानध्यानं भवस्य श्रेयस्य कारणं जन्मनः कारणं ॥ पेशस्कारिध्यानेन कीटादीतथात्वदृष्टत्वादित्यर्थः ४५

कु

श्री भा० द० उ० टी० ८४

स्वाश्मनवाखेचराः प्रमथ्यामु ५१ पापंधर्मद्विषं ग्रत्रहेतुः कलिं कलेरंशं अतएव कुरुकुलामयं व्याधिं नाशकं ५२ वितानं यज्ञं ५३ इति श्रीभावार्थदीपिकायां दशमस्कंधे चतुःसप्ततितमोऽध्यायः ७४

साधयित्वा क्रतुं राज्ञः कृष्णो योगेश्वरेश्वरः उवास कतिचिन्मासान्सुहृद्भिरभियाचितः ४७
ततोऽनुज्ञाप्य राजानमनिच्छंतमपीश्वरः ययौ सभार्यः सामात्यः स्वपुरं देवकीसुतः ४८
वर्णितं तदुपाख्यानं मया ते बहुविस्तरं वैकुंठवासिनोर्जन्म विप्रशापात्पुनः पुनः ४९
राजसूयावभृथ्येन स्नातो राजा युधिष्ठिरः ब्रह्मक्षत्रसभामध्ये शुशुभे सुरराडिव ५० रा
ज्ञा सभाजिताः सर्वे सुरमानवखेचराः कृष्णं क्रतुं च शंसंतः स्वधामानि ययुर्मुदा ५१ दु
र्योधनमृते पापं कलिं कुरुकुलामयं यो न सेहे श्रियं स्फीतां दृष्ट्वा पांडुसुतस्य तां ५२
य इदं कीर्तयेद्विष्णोः कर्म चैद्यवधादिकं राजमोक्षं वितानं च सर्वपापैः प्रमुच्यते ५३
इति श्रीभागवते दशमस्कंधे चतुःसप्ततितमोऽध्यायः ७४ श्रीराजोवाच अजातशत्रो
स्तं दृष्ट्वा राजसूयमहोदयं सर्वे मुमुदिरे राजन्नृदेवा ये समागताः १ ॥ राम ॥

ब्रह्मन्

एवं युक्तं प्रतीतमे यज्ञावभृथसंभ्रमः सुयोधनस्य चास्ताता ननभंगो महाशिभ्रमात् दुर्योधनस्
यैकस्यैव दुःखकारणं प्रष्टुमक्रमनुवदति अजातशत्रोरिति ॥ २ रामायनमः ॥

राम० ८४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क्रियाभिर्विदानामंग क्रियाभिः कृतवान्द्रुतं सर्वशरीरे राजसूयश्च ॥ १८ ॥ पत्नीसंयाजोयागविशेषः अवभृथसंबं

समस्त्राप्तु यमारूढः सदस्यं रुक्ममालिनं ॥ अग्रे चतस्रपत्नीभिः क्रियाभिः कृतवानिव ॥ १८ ॥
पत्नीसंयाजावभृथ्यैरुपुरिवातेतमृत्विजः ॥ स्नाव्यांतं स्नापयोचक्रु गंगायां सह कृत्स्नया ॥ १९
देवदुंदुभयो नेदुर्नरदुंदुभिभिः सह ॥ मुमुचुः पुष्पवर्षाणि देवर्षिपितृमानवाः ॥ २० ॥ सस्नुः
तत्र तत्र सर्ववर्णाश्रमयुता नराः ॥ महापातकायिनः सद्योमुच्येतां किल्बिषात् ॥ २१ ॥ अथ
राजा हदे क्षौमे परिधाय स्वलंकृतः ॥ ऋत्विक्सदस्य ब्रह्मर्षीन् नानर्चाभरणांबरैः ॥ २२ ॥ बंधु
तातिन्स्यामित्रसुहृद्दोन्यांश्च सर्वशः ॥ अभीक्ष्णं पूजयामास नारायणपरो नृपः ॥ २३ ॥ सर्वे
जनाः स्वरुचोमणिकुंडलस्रगुष्णीषकंचुकदुकूलमहार्घ्यहाराः ॥ नार्यश्च कुंडलयुगाल
कर्हंदलश्रवक्राश्रियाकनककमेखलया विरेजुः ॥ २४ ॥ अथर्त्विजो महाशीलाः सदस्या ब्रह्म
वादिनः ॥ ब्रह्मक्षत्रियविट्शूद्रा राजानो ये समागताः ॥ ॥ २५ ॥

पि श्रावभृथ्यं चतैः चरितातान्नन्वशापयेसर्वशः ॥ २६ ॥ अदहनेनन्नतनेश्वानर्चार्चितवान् ॥ २२ ॥ रामायनमः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा० द० उ० टी० ८८

गतज्वरः निश्चिंतआसीत ३० अच्युते आत्मा यस्य तस्य ३१ नरेंद्रादीनां लक्ष्मीः लक्ष्म्यो विभूतयः विश्वसृजा मयेनोपक्लृप्ताः विरचिताः ताभिः सह कुरुराट् दुर्योधनोतप्यत ३२ महिषीसहस्रमितिबहुवो

देवर्षिपितृभूतानिलोकपालाः सहानुगाः ॥ पूजिताः तमनुज्ञाप्य स्वधामानि ययुर्नृप २६
हरिदासस्यराजर्षेराजसूयमहोदयं ॥ नैवातृप्यन्प्रशंसंतः पिबन्मर्त्योमृतं यथा ॥ २७ ॥ ततो यु
धिष्ठिरो राजा सुहृत्संबंधिबांधवान् ॥ प्रेम्णा निवासयामास कृष्णं च त्यागकातरः ॥ २८ ॥ भग
वानपि तत्रांग न्यवात्सीत्तत्प्रियंकरः ॥ प्रस्थाप्य यदुवीरांश्च सांबादींश्च कुशस्थलीं ॥ २९
इत्थं राजा धर्मसुतो मनोरथमहार्णवं ॥ सुदुस्तरं समुत्तीर्य कृष्णेनासीद्गतज्वरः ॥ ३० ॥ एक
दांतः पुरे तस्य वीक्ष्य दुर्योधनः श्रियं ॥ अतप्यद्राजसूयस्य महित्वं चाच्युतात्मनः ॥ ३१ ॥ तस्मि
न्नरेंद्रदितिजेंद्रसुरेंद्रलक्ष्मीर्नाना विभांति किल विश्वसृजोपक्लृप्ताः ॥ ताभिः पतीन्द्रुपर ५४
दराजसुतोपतस्थे यस्यां विषक्तहृदयः कुरुराडतप्यत ॥ ३२ ॥ यस्मिंस्तदा मधुपतेर्महिषीस
हस्रं श्रोणीभरेण शनकैः क्वणदंघ्रिशोभं ॥ मध्ये सुचारु कुचकुंकुमशोणहारं श्रीमन्मु
खं चपलकुंडलकुंतलाढ्यं ॥ ३३ ॥ सभायां मयक्लृप्तायां क्वापि धर्मसुतोधिराट् ॥ वृतोनुजैर्बं
धुभिश्च कृष्णेनापि स्वचक्षुषा ॥ ३४ ॥ ॥ ॥

पलक्षणं क्वणद्भिः अंघ्रिभिः शोभा यस्य मध्ये सुचारु मध्यमित्यर्थः शोणहारा यस्य तत् ॥ चलैः कुं
डलैः कुंतलैश्च आढ्यं सेपत्नं श्रीशोभतेति शेषः ३३ क्वापि कदाचित् सर्वाधिराजेइति शेषः स्वस्य चक्षु

राम: ८८

इतिश्रुतं नः गाथा देवसर्वः ॥ दुर्योधनस्यासहकारणत्वेन यागमहोत्सवमेव पुनः सिंहावलोकन्यायेन निरूपय
ति पितामहस्येत्यादिना ॥ एकादेतः पूर्वेतस्यान्वतः प्राक्तनेन ग्रंथेन ॥ २ ॥ प्रेमबंधनाः प्रेमयंत्रिताः ॥ ३ ॥ पूजा
यां संमानने द्रव्यसाधने नानावस्तुसंपादने ॥ ४ ॥ गुरुशुश्रूषणे चंदनालेपनादौ ॥ ५ ॥ निरूपिताः नियुक्ताः
गुरु

दुर्योधनं वर्जयित्वा राजानः सर्षयः सुराः ॥ इति श्रुतं नो भगवंस्तत्र कारणमुच्यतां ॥ २ ॥ श्रीशु
क उवाच ॥ पितामहस्य ते यज्ञे राजसूये महात्मनः ॥ बांधवाः परिचर्यायां तस्या तत्प्रेमबंधनाः २
भीमो महानसाध्यक्षो धनाध्यक्षः सुयोधनः ॥ सहदेवस्तु पूजायां नकुलो द्रव्यसाधने ॥ ४ ॥ स गुरु
तो शुश्रूषणे जिष्णुः कृष्णः पादावनेजने ॥ परिवेशने द्रुपदजा कर्णो दाने महामनाः ॥ ५ ॥ युयु
धानो विकर्णश्च हार्दिक्यो विदुरादयः ॥ बाह्लीकपुत्रप्रमुखा ये च संतर्दनादयः ॥ ६ ॥ निरूपि
ता महायज्ञे नानाकर्मसु ते तदा ॥ प्रवर्तंते स्म राजेंद्र राज्ञः प्रियचिकीर्षवः ॥ ७ ॥ ऋत्विक्सदस्य
बहुवित्सु सुहृत्तमेषु स्विष्टेषु सूनृतसमर्हण दक्षिणाभिः ॥ चैद्ये च सात्वतपतेश्चरणं प्रविष्टे
चक्रुस्ततस्त्ववभृथस्नपनं द्युनद्यां ॥ ८ ॥ मृदंगशंखपणवधुंधुर्यानकगोमुखाः ॥ वादित्रा
णि विचित्राणि नेदुरवभृथोत्सवे ॥ ९ ॥ ॥ राम ॥ ॥

सेन: नानाकर्मसु प्रवर्तंते स्म ॥ ६ ॥ ऋत्विजश्च सदस्याश्च सभासदश्च ॥ बहुविदश्च तेषु स्विष्टेषु सूनृतं
प्रियवाक् समर्हणमलंकारादि दक्षिणाश्च प्रसिद्धाः ताभिः द्युनद्यां गंगायां ॥ ८ ॥ ॥ राम ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा० द० टी० अ० ७५

विचित्रध्वजपताकाग्रैः प्रियेषु तैरिभेंद्रैः स्यंदनैः अर्वभिः स्वलंकृतैर्भटैश्च एवं चतुरंगैः सैन्यैर्निर्ययुः ॥११॥ यजमानो युधिष्ठि
रः पुरः सरो येषां ते ॥१२॥ सदस्याः ऋत्विजः अन्ये च द्विजश्रेष्ठा निर्ययुः किं च गंधर्वादिभिः स्वलंकृता नरा नार्यश्च मि
थो विजह्रुः ॥ रसा आह तैलेति किं च सांद्रकुंकुमादिभिः पुंभिर्लिप्ताः तान्प्रलिंपंत्यो वारयोषितो नर्तक[illegible] ॥१२

नर्तक्यो ननृतुर्हृष्टा गायका यूथशो जगुः ॥ वीणावेणुतलोन्नादस्तेषां स दिवमस्पृशत् ॥१०॥ चि-
त्रध्वजपताकाग्रैरिभेन्द्रस्यन्दनार्वभिः ॥ स्वलंकृतैर्भटैर्भूपा निर्ययू रुक्ममालिनः ॥११॥ यदुसृं-
जयकांबोजकुरुकेकयकोसलाः ॥ कंपयन्तो भुवं सैन्यैर्यजमानपुरः सराः ॥१२॥ सदस्यर्त्विग्द्वि-
जश्रेष्ठा ब्रह्मघोषेण भूयसा ॥ देवर्षिपितृगंधर्वास्तुष्टुवुः पुष्पवर्षिणः ॥१३॥ स्वलंकृता नरा नार्यो गं-
धस्रग्भूषणांबरैः ॥ विलिंपंत्योऽभिषिंचंत्यो विजह्रुर्विविधै रसैः ॥१४॥ तैलगोरसगंधोदहरिद्रा-
सांद्रकुंकुमैः ॥ पुंभिर्लिप्ताः प्रलिंपंत्यो विजह्रुर्वारयोषितः ॥१५॥ गुप्ता नृभिर्निरगमन्नुपलब्धु-
मेतद्देव्यो यथा दिवि विमानवरैर्नृदेव्यः ॥ ता मातुलेयसखिभिः परिषिच्यमानाः सव्रीड-
हासविकसद्वदना विरेजुः ॥१६॥ ता देवरानुत सखीन्सिषिचुर्दृतीभिः ॥ क्लिन्नांबरा विवृत-
गात्रकुचोरुमध्याः ॥ औत्सुक्यमुक्तकवराश्च्यवमानमाल्याः क्षोभं दधुर्मलधियां रुचिरैर्वि-
हारैः ॥१७॥

नृभिर्गुप्ताः रथ्यादियानैर्नृदेव्यो राजपत्न्यः निरगमन् निर्ययुः एतदुपलब्धुं विमानवरैर्देव्यो यथा तद्वत् ॥
मातुलेयैः सखिभिश्च परिषिच्यमानाः सव्रीडेन हासेन विकसंति वदनानि यासां ताः ॥१६॥ देवरान्
तिभ्रातृन् [illegible] उत सखीन् दृतीभिः उदकनोदनचर्मयंत्रैः सेचनपात्रैश्च मलधियां कामिनां ॥१७॥

राम ७५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मानीसाठ्यंकारः । क्षिपन्रुषाः स्मारीनपि क्षिपन् ॥ ३५ ॥ तत्र स्थलेवस्त्रांतमभ्यगृह्णात्तस्मात्कोविन्नवान्कृतः ॥
तस्मिन्स्थलेएववस्त्रान्ताजलमिवाजलेवापनतरुत्तःस्थलवद्भ्रान्त्या ॥ ३६ ॥ भुवोभारंसमुज्जिहीर्षुरिति
यस्यामेयपादितेनकलहबीजेनकुरुणांसंहारंकरिष्यामीतिमत्वाकिं वयस्यदृष्टिमात्रेणदुर्योधनोभ्र

टी २

आसीनः कांचनेसाक्षादासनेमघवानिव । पारमेष्ठ्यश्रियाजुष्टः स्तूयमानश्चवंदिभिः
३४ तत्रदुर्योधनोमानीपरीतोभ्रातृभिर्नृप । किरीटमालीन्यविशदसिहस्तः क्षिपन्रुषा ॥ ३५
स्थलेभ्यगृह्णाद्वस्त्रांतंजलमित्यभिशंकितः । जलेचस्थलवद्भ्रांत्यामयमायाविमोहितः
३६ जहासभीमस्तंदृष्ट्वास्त्रियोनृपतयोपरे । निवार्यमाणाअप्यंगराज्ञाकृष्णानुमोदिताः ॥
३७ सव्रीडितोवाग्वदनोरुषाज्वलन्निष्क्रम्यतूष्णींप्रययौगजाह्वयं । हाहेतिशब्दः सुमहा
नभूत्सतामजातशत्रुर्विमनाइवाभवत् ३८ बभूवतूष्णींभगवान्भुवोभरंसमुज्जिही
र्षुर्भ्रमतिस्मयद्दृशा ॥ ३९ ॥ एतत्तेभिहितंराजन्यत्पृष्टोहमिहत्वया । सुयोधनस्यदौरा
त्म्यंराजसूयेमहाक्रतौ ॥ ४० ॥ इतिश्रीभागवतेदशमस्कंधेदुर्योधनमानभंगोपंचसप्ततितमो
ध्यायः ॥ ७५ ॥ श्रीराम ॥

मतिमस्मृत्वा । तिंप्राप्तमयमायाहानिमित्तमात्रंसम्भ्रमात्रहरंबीजप्रमेभीमसेनादिहासेनवपराभवेविधाय
रक्षनासीदित्यर्थः ॥ ७ ॥ दशोऽयंचसप्ततितमः ॥ ७५ ॥

श्री
भा. द.
उ. टी.
८०

ततः प्रभृत्यनिमेषं स्मितमाल्वमहाम्रये ॥ प्रमद्दाप्रहारेणारणात्प्रद्युम्ननिर्गमः ॥ प्रयाय धर्मराजस्य
राजसूयमहोत्सवे ॥ निहन्त्र सौभराजादीन्यथोपायमरच्युतः ॥ आशुतोषापि भगवान्ममायतिः श्रीकृष्ण
विद्विषि माल्ववरसावैफल्यामन्यमानो न श्रीत्रं प्रादुर्भूततनस्यानि निर्बंधमालद्यमेवस्रोज्ञेचवरेः

श्रीशुक उवाच ॥ अथान्यदपि कृष्णस्य शृणु कर्माद्भुतं नृप ॥ क्रीडानरशरीरस्य यथा सौभ
पतिर्हतः ॥ १ ॥ शिशुपालसखः साल्वो रुक्मिण्युद्वाह आगतः ॥ यदुभिर्निर्जितः संख्ये जरा
संधादयस्तथा ॥ २ ॥ साल्वः प्रतिज्ञामकरोच्छृण्वतां सर्वभूभुजां ॥ अयादवीं क्ष्मां करिष्ये पौरुषं
मम पश्यत ॥ ३ ॥ इति मूढः प्रतिज्ञाय देवं पशुपतिं प्रभुं ॥ आराधयामास नृपः पांसुमुष्टिं सकृद्
ग्रसन् ॥ ४ ॥ संवत्सरांते भगवानाशुतोष उमापतिः ॥ वरेण छंदयामास साल्वं शरणमागतं ॥ ५
देवासुरमनुष्याणां गंधर्वोरगरक्षसां ॥ अभेद्यं कामगं वव्रे स यानं वृष्णिभीषणं ॥ ६ ॥ तथेति गिरि
शादिष्टो मयः परपुरंजयः ॥ पुरं निर्माय साल्वाय प्रादात्सौभमयस्मयं ॥ ७ ॥ स लब्ध्वा कामगं यानं
तमोधाम दुरासदं ॥ ययौ द्वारवतीं साल्वो वैरं वृष्णिकृतं स्मरन् ॥ ८ ॥ ॥ ॥ राम ॥ ॥ ॥

५२

णां छंदयामास स्कंधांकर्बरितवान्वरं वृष्णिभिस्तु वाच ॥ ५ ॥ तथेति प्रतिज्ञातो गिरिशो नादिष्टः अथ समये लो
हमयं सौभपुरसंज्ञं निर्माय सर्वपित्वा प्रादात् ॥ ७ ॥ तमसो धरस्य धामाश्रयं यस्मिन्स्यैः अपरैर्दुरासदं दुःप्राप ॥ ८ राम ८०

का १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रासादाग्रहस्ताः श्वेतैर्लाः नद्युपविग्रहाः तोलिकाः नद्युपर्यंतकुम्भानिताविहारान्क्रीडास्थानानितिसव-
भजनाकिंच ॥ ९ ॥ तस्मादिमानाश्यानशर्करापाराम्नेपातवज्रलोपलाः ॥ ९ ॥ नेषांनिशिभवेतमःउत्-
गृहस्यैः दवाकिंचविव्यापेनाह ॥ ९ ॥ सर्वाणिमयानिवैरवाणिगृहप्रासादानियेषांतैः श्रयोलाहंतनक्ता

निरुद्ध्यसेनयासासाल्तोमहत्तर्यभरतर्षभ ॥ पुरीवभंजोपवनान्युद्यानानिचसर्वशः ॥ ९ ॥ सर्गेषु
शाणिहाराणिप्रासादाट्टालतोलिकाः ॥ विहरन्तिविमार्गाग्रान्निपेतुः शस्त्रवृष्टयः ॥ १० ॥
शि... साश्वाशनयः सर्वाश्चाश्मसारशर्कराः ॥ प्रचंडश्चकवातोभूद्रजसाछादितादिशः
११ स्तनयंमाना मौभ्रमहत्स्यानगरीमृगो ॥ नाभ्यपद्यतशंराजंस्त्रिपुरेणयथामही ॥ १२ ॥ प्र
भ५ पुत्र्योगवान्नीदार्द्धमानानिजाः प्रजाः ॥ ममैषदुहितभ्यथाह्यहोरोरयाद्रुदोमहारथः ॥ १३ ॥ सा
त्यकिश्चारुदेष्णश्चसांबोक्रूरःसहानुजः ॥ हार्दिक्योभानुविंदश्चगदश्चशुकसारणौ ॥ १४
श्रपरेचमहेष्वासारथयूथपयूथपाः ॥ निर्य्युदंशिताग्रुप्ताराश्चभाश्वपदातिभिः ॥ १५ ॥ त
तः प्रववृतेयुद्धंशाल्वानांयदुभिःसह ॥ यथासुराणांविबुधैः तुमुलंलोमहर्षणं ॥ १६ ॥ ताश्च
सौभपतेर्मायादिव्यास्त्रैरुक्मिणीसुतः ॥ क्षणेननाशयामासनैशंतमइवोष्णगुः ॥ १७ ॥ विव्या
धपंचविंशत्यास्वर्णपुंखैरयोमुखैः ॥ शाल्वस्यध्वजिनीपालंशरैःसन्नतपर्वभिः ॥ १८ ॥
शतेनशाल्वंएकैकेनास्यसैनिकान् ॥ दशभिर्दशभिस्तीक्ष्णैर्वाहनानित्रिभिस्त्रिभिः
यान्यश्चांगिनियेषांने ॥ १८ ॥ ॥

श्री॰ भा॰ द॰ उ॰ टी॰ ८८

से निकान्महान्नेनेतन्नसारथीन ॥ १७ ॥ मयपरसेनयो वर्त्तमानाः सर्वेषूजयामास्तः संमानितवंतः
१॰ ॥ कदाचित्कुत्रचिदेकं कदाचिदेकत्र पंचकाचित्रदर्शपनेकाचित्रदर्शपनेपवंदुर्विभाव्यं प्रविलकोमभून
११ ॥ किंचकाचिदिति ॥ एवंदुरवास्थितंप्रनवास्थितंवाभूत् ॥ ११ ॥ आश्रिवद्राहकः अर्कवधुगवन्तर्वंतः

केनास्यसै(

शतेनानाउयन्नात्वमेकं निकान् ॥ दशभिर्दशभिर्नेत्रनाहनानि त्रिभिस्त्रिभिः ॥ १९ ॥ नदद्भुते
महत्कर्मप्रधुम्नस्यमहात्मनः ॥ तेहृष्टाःपूजयामासुः म वैस्वपरसेनिकाः ॥ २० ॥ बहुरूपैक
रूपंनदृश्यतेनवदृश्यते ॥ मायामयंमयकृतंदुर्विभाव्यंपरैरभूत् ॥ २१ ॥ क्वचिद्भूमौक्वचि
द्व्योम्निगिरिमूर्ध्नि जलेक्वचित् ॥ अलातचक्रवद्भ्राम्यत्सौभंतद्दुरवस्थितं ॥ २२ ॥ यत्रयत्रोप
लक्ष्येतससौभःसहसैनिकः ॥ शाल्वस्ततस्ततोमुंचञ्छरान्सात्वतयूथपाः ॥ २३ ॥ शरैरग्न्य
र्कसंस्पर्शैराशीविषदुरासदैः ॥ पीड्यमानपुरानीकः शाल्वोमुह्यत्परेरितैः ॥ २४ ॥ शाल्वा
नीकपशस्त्रौघैर्वृष्णिवीरा भृशार्दिताः ॥ नतत्यजूरणंस्वंस्वं लोकद्वयजिगीषवः ॥ २५

राम॰ ॥ राम॰

संस्पर्शोयेषांतैः ॥ आशीविषवदेकदेशस्पर्शमात्रेणमारकत्वान्दुरासदैः ३ः सहैः ॥ पीड्यमानं
पुरंअनीकानिचयस्यसः परैर्यदुभिः ईरितैर्मुक्तैः ॥ २४ ॥ भृशार्दिताअपिस्वंस्वंरणंस्थानमा
पुद्धभूमिंनतत्यजुः ॥ २५ ॥ श्रीरामकृष्णाय ॥ ॐ ॥

राम॰
८८

मौर्व्यां कास्त्रां यममप्यामन्नथात मर्प्यागरयाव्याहतः ॥ २६ ॥ श्रुत्वोवाहरणभूमिरन्यतो निनाय ॥ २७ ॥
मतमज्ञो विनाङ्कीवैवितेयमतेन नवयास्तेन ॥ २८ ॥ पितरोरामस्मस्त्रावशिष्टमगमत्या संगतस्त
नाम्भो २९ः सयोमणकिंनुवक्ष्यामीति ॥ ३० ॥ भ्रातृजामयोगात्भार्याः निश्चितमत्क्षेत्रकथयिः



मार्त्तमात्योगमात्रामसप्युमन्त्रप्राकापीडितः ॥ आसायगदयामौर्व्यां व्याहत्यवनदक्षली
प्रयुक्तंगदयाशीर्णवक्त्रः स्यात्मसिदंम श्रुत्वोवाहरणान्नूनोधर्मविहुरकात्मनः ॥ ३१ ॥
लब्धसंज्ञोमहूर्त्तेनकार्तिः सारथिमब्रवीत् ॥ अहोप्रमाधिरं स्मृतयद्धलान्मिवसर्पिणं ॥
॥ न यद्गनांजल्लेजंतिः श्रुयतेरणविश्रुतः ॥ विनामन्क्लीवविन्नेनस्मृतेनप्राप्तकल्मषा
न ॥ ३३ ॥ किं नु वक्ष्यामि संस्थापितनरो रामके शवौ ॥ उद्दामसुगपक्रांतः ३४ तत्रात्मनः
नमे ॥ ३५ ॥ व्यक्तंमकथयिष्यतिहमत्योभ्रातृजामयः ॥ कैकेयकथंवीरतवामेः कथ्य ॥ गतो ३
तोस्यथे ॥ ३६ ॥ मोयिक... ध्वमें जानतानाथमत्कनमेमनुभ्यथाविभो ॥ सूतः कृत्स्नुगते
रते दृष्टिनेमारथिर्युधी ॥ ३७ ॥ एतद्धि दिवान्मयापोवाद्दितोरणात् ॥ उपसृष्टः
परेणातिमूर्छितोगदयाहतः ॥ ३८ ॥

व्येतितत्कथमनुकरोतिकथंकथयामिति ॥ ३९ ॥ हे विभो समर्थेपवणतदं सर्पेणंपमेमाहस्मनरति
४० ॥ श्रुत्वोवाहितोरणादपनीतः उपसृष्टः उपसृ... पीडाप्रासः इतिकन्नावतः परेणशत्रुणाग
दयाहतः सन्मूर्छितोनिः संज्ञ नतोभवानिति ॥ ॥ ४१ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री· भा·द· उ·टी· ८९

इति श्रीभावार्थदीपिकायां दशमे षट्सप्ततितमः ॥७६॥ सप्तसप्ततितमे नानामायाविक्रमैः
हतः सेनागत्य साल्वस्तु हतः सौभं [illegible] तु चूर्णितं ॥ दंशितः सन्नद्धः ॥१॥ विधमन्तं तपयन्तं प्रतिहत्य प्रतिरुध्य
[illegible] हानां विनियोगमाहत्य नाराचैरिति ॥३॥ सौभेयाः सौभस्थाः ॥४॥ नवानां रात्रीणां समाहारो नवरात्रं त्रया-

२ ति विध्यन्नाराचैरष्टभिः स्मयन् ॥२॥ चतुर्भिश्चतुरो वाहान्सूतमेकेन चाहनत् ॥ द्वाभ्यां धनुश्च ॥३

इति श्रीभागवते महापुराणे दशमस्कंधे षट्सप्ततितमोऽध्यायः ॥७६॥ श्रीशुक उवाच ॥ स उ-
पस्पृश्य सलिलं दंशितो धृतकार्मुकः ॥ नय मां द्युमतः पार्श्वं वीरस्येत्याह सारथिं ॥१॥ वि-
धमंतं स्वसैन्यानि द्युमंतं रुक्मिणीसुतः ॥ प्रतिहत्य प्र[२] केतुं च शरेणान्येन वै शिरः ॥३॥ ग-
द[illegible]सात्यकिसांबाद्या जघ्नुः सौभपतेर्बलं ॥ पेतुः समुद्रे सौभेयाः सर्वे संछिन्नकंधराः ॥४॥
एवं यदूनां साल्वानां निघ्नतामितरेतरं ॥ युद्धं त्रिनवरात्रं तदभूत्तुमुलमुल्बणं ॥५॥ श्रीशु-
क उवाच ॥ इंद्रप्रस्थं गतः कृष्णः आहूतो धर्मसूनुना ॥ राजसूयेऽथ निर्वृत्ते शिशुपाले च सं-
स्थिते ॥६॥ कुरुवृद्धाननुज्ञाप्य मुनींश्च ससुतां पृथां ॥ निमित्तान्यतिघोराणि पश्यन्द्वार-
वतीं ययौ ॥७॥ आह चाहमिहायात आर्यमिश्राभिसंगतः ॥ राजन्याश्चैद्यपक्षीया नूनं हन्युः
पुरीं मम ॥८॥ ॥१॥

णां [illegible] नवरात्राणां समाहारस्त्रिनवरात्रं सप्तविंशतिरहोरात्राणीत्यर्थः ॥ तुमुलं आकुलं उल्बणं घोरं ॥ एव
म[illegible] नुपन्यस्यति इंद्रप्रस्थं गत इत्यादि ॥५॥ आह चेति स्वगतमेव पथि चिंताविजृंभितं भाषणं आर्यमि
श्राभिसंगतः बलभद्रसहितः ॥ ॥८॥ ॥ रामायनमः ॥ ॥ ॥ राम ॥ राम ॥

रामः
दम

दुर्निमि: दुर्पशनाकुलएवचिंतयनदारकामागत्य स्वानांकदनंवीक्ष्यसौभंचसाल्वराजंचवीक्ष्यरामेपुररक्ष
णंप्रतिनियुज्यदारुकंप्राहेत्यन्वय: ९ तेनतया ॥ १० आस्थायसम्यगधिष्ठायअरुणानुजेगरुडेध्व
जेवर्तमाने ॥ ११ हतप्रायस्वबलस्येश्वर: ॥ १२ तंचसाल्वंशरसंदोहै: ॥ शरजालै: रविसूर्यइवरश्मिभि: स्वनी

इतिहंचिंत्य भगवानाजगाम त्वरान्वित: संग्रामभूमिमागत्य प्रद्युम्नादीन्निरीक्ष्य स:

वीक्ष्यतत्कदनंस्वानांनिरूप्यपुररक्षणं ॥ सौभंचसाल्वराजंचदारुकंप्राहकेशव: ॥ ९ ॥ रथंप्राप
यमेसूतसाल्वस्यांतिकमाशुवै ॥ संभ्रम: तेनकर्तव्योमायावीसौभराडयं ॥ १० इत्युक्त:चोदया
मासरथमास्थायदारुक: ॥ विशंतंददृशु: सर्वेस्वेपरेचारुणानुजं ॥ ११ ॥ साल्वश्चकृष्णमा
लोक्यहतप्रायबलेश्वर: ॥ प्राहरत्कृष्णसूतायशक्तिंभीमरवांमृधे ॥ १२ ॥ तामापतंतींनभसि
महोल्कामिवरंहसा ॥ भासयंतींदिश: शौरि: सायकै: शतधाछिनत् ॥ १३ ॥ तंचषोडशभिर्वि
द्ध्वाबाणै: सौभंचखेभ्रमत् ॥ अविध्यतशरसंदोहै: खंसूर्यइवरश्मिभि: ॥ १४ ॥ साल्व: शौरेस्तु
दो:सव्यंसशार्ङ्गंशार्ङ्गधन्वन: ॥ बिभेदन्यपतद्धस्ताच्छार्ङ्गमासीत्तदद्भुतं ॥ १५ ॥ हाहाकारो
महानासीद्भूतानांतत्रपश्यतां ॥ विनद्यसौभराडुच्चैरिदमाहजनार्दनम् ॥ १६ ॥ ॥ राम ॥

लव्वादिभि: ॥ आकाशेभ्रमासौभस्यभ्रविंत्यवेगलवबाकुल्यादिभि: शराणांवर्षिमसाहर्षंप्रश्रयत्वेनैव
रश्मिवत्शरजालप्रसारणात् सूर्यतुल्य: श्रीकृष्ण इति ॥ १४ ॥ दोर्बाहु ॥ १५ ॥ १६ ॥ ॥ ॥ राम

श्री० भा० द० उ० टी० ५३

साल्वः शिशुपालस्यार्हत्तां वीदत्तां अस्माकं प्रमत्तः अनवहितः व्यापादितो निहतः ॥ १७ ॥ अपराजितोहमिति मे
नवंतं ॥ अपुनरावृत्तिमस्तु तिष्ठेः स्थास्यसि ॥ १५ ॥ देवक्या प्रहितोस्मीति नत्वा प्राह वचो रुदन् ॥ २१ ॥ कृष्णीद
पन्नया मूढनः साल्वुर्भ्रातर्भार्यो ह्यनैदत्तां ॥ प्रमत्तः सभामध्ये त्वया व्यापादितः साल्वा ॥ ७ ॥ तंतव
पनिशृत्तैर्बाणैरपराजितमानिनं ॥ नयाम्यपुनरावृत्तिं यदि तिष्ठेर्ममाग्रतः ॥ १८ ॥ श्रीभगवानुवाच
वृथा त्वं कत्थसे मंद न पश्यस्यंतिके तकं ॥ पौरुषं दर्शयंत्यस्मि शूरा न बहुभाषिणः ॥ १९ ॥ इत्युक्त्वा
भगवान्साल्वं गदयाभीमवेगया ॥ तताडजत्रौ संरब्धः स चकंपे वमन्नसृक ॥ २० ॥ गदायां सन्निवृत्ता
यां साल्वस्त्वंतरधीयत ॥ ततो मुहूर्त आगत्य पुरुषः शिरसाच्युतं ॥ २१ ॥ देवक्या प्रहितोस्मीति नत्वा
प्राह वचो रुदन् ॥ २१ ॥ कृष्ण कृष्ण महाबाहो पिता ते पितृवत्सल ॥ बद्ध्वापनीतः साल्वेन सौनिके
न यथा पशुः ॥ २२ ॥ निशम्य विप्रियं कृष्णो मानुषीं प्रकृतिं गतः ॥ विमनस्को घृणी स्नेहाद्ब
भाषे प्राकृतो यथा ॥ २३ ॥ कथं राममसंभ्रांतं जित्वाजेयं सुरासुरैः ॥ साल्वेनाल्पीयसा नीतः पि
ता मे बलवान्विधिः ॥ २४ ॥ इति ब्रुवाणो गोविंदे सौभराट् प्रत्युपस्थितः ॥ वसुदेवमिवानीय
कृष्णं चेदमुवाच सः ॥ २५ ॥ एष ते जनिता तातो यदर्थमिह जीवसि ॥ वधिष्ये वीक्षतस्ते मुमीशः
चेत्पाहि बालिश ॥ २६ ॥ एवं निर्भर्त्स्य मायावी खड्गेनानकदुंदुभेः ॥ उत्कृत्य शिर आदाय खस्थं
सौभं समाविशत ॥ २८ ॥ ॥ रामायनमः ॥ ॥

यावान् ॥ २७ ॥ जनिता जनयिता ईशः चेत् शक्तः चेत् ॥ २९ ॥ श्रीरामचंद्राय नमो नमः ॥ ॥ राम ॥ ॥॥॥

राम० ५०

सुबोधः स्वनोत्तानवानपि स्वजनस्नेहतः ॥ मानुषस्वभावेनोपप्लुतो निमग्न स्तेप्रतिष्ठत जनः तत्र स
वैश्रास्वरीं मायामबुध्यत मायेयमिति ज्ञातवान् ॥ २७ ॥ स्वप्नेस्वप्रपंचेयथा ॥ एवंपरमतत्त्वमुपन्यस्तंनिराक
रोति एवमिति ॥ २८ ॥ केचनान्विताः पूर्वापरानुसंधानरहिताः ॥ तदाह यत्स्ववाचइति ॥ तत्रान्तुस्मरंतीत्य
र्थः ॥ अयमभिप्रायः मतावतराजसूयार्थंसहसभेद्गगतः ॥ श्रीकृष्णसंकर्षणामनुज्ञाप्येति एवंमन्कव

ततोमुहूर्तंप्रकृतावुपप्लुतः स्वबोधआस्तेस्वजनानुषंगतः ॥ महानुभावस्तदबुध्यदासु
रीं मायांससाल्वप्रसृतांमयोदितां ॥ २७ ॥ नतत्रदूतंनपितुःकलेवरंप्रबुद्धआजौसमपश्यद
च्युतः ॥ स्वाप्नंयथाचांबरचारिणंरिपुंसौभस्थमालोक्यनिहंतुमुद्यतः ॥ २८ ॥ एवंवदंतिरा
जर्षेऋषयः केचनान्विताः ॥ यत्स्ववाचोविरुध्येतनूनंतेनस्मरंत्युत ॥ २९ ॥ क्वशोकमोहौस्ने
होवाभयंवायेऽज्ञसंभवाः ॥ क्वचाखंडितविज्ञानज्ञानैश्वर्यस्त्वखंडितः ॥ ३० ॥ ॥

तत्र संभावितं चेत्याह ॥ क्वशोकमोहाविति ॥ २९ ॥ भयंवाऽज्ञनिमित्तदर्शनकृतं नूनं हन्तुः पुरीममेतिय
दुक्तंयच्चहृद्स्नात्प्रगाढस्मपनादिति ॥ उक्तंतत्रयंवाक्केति ॥ अज्ञेषुसंभावोयेषांते अखंडितानिविज्ञानै
श्वर्याणियस्यसः ॥ तत्रविज्ञानं ज्ञानं वाह्यविषयं किंच ॥ ३० ॥ रामायनमः ॥ ॥ ॥ राम ॥ ॥ ॥

स्वरूपविषयं ...

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भा॰ द॰ टी॰ ७॰ ५१

यस्यपादसेवयाऊर्जितापुष्कलायाआत्मविद्यातया ॥ अनादिरात्मनोआत्मविपर्ययग्रहस्य ॥ अहंकृताश्वस्व
स्वीयः स्वीयस्यादिलक्षणः तद्धित्वत्तिनाशयंतिसंत: ॥ ऐश्वर्यपदंचतस्यसतोगतेऊतोनुमोहइतिः अतो

यत्पादसेवोर्जितयात्मविद्ययाहित्वंत्यनाद्यात्मविपर्ययग्रहं ॥ लभंतआत्मीयमनंतमैश्वरं
कुतोनुमोहः परमस्यसद्गतेः ॥ तेषामुग्रप्रयोगैः प्रहरंतमोजसासाल्वानुगैः शौरिरमोघविक्र
मः ॥ २० ॥ विद्ध्वाछिनद्वर्मधनुःशिरोमणिंसौभंचशत्रोर्गदयारुरोजसः ॥ २१ ॥ तत्कृष्णहस्तेरित
याविचूर्णितंपपाततोयेगदयासहस्रधा ॥ विसृज्यतद्भूतलमास्थितोगदामुद्यम्यसाल्वोच्यु
तमभ्यगाद्द्रुतम् ॥ २२ ॥ आधावतःसगदंतस्यबाहुंभल्लेनछित्वाथरथांगमद्भुतं ॥ वधायसा
ल्वस्यलयार्कसन्निभंबिभ्रद्बभौसार्कइवोदयाचलः ॥ २४ ॥ जहारतेनैवशिरःसकुंडलं
किरीटयुक्तंपुरमायिनोहरिः ॥ वज्रेणवृत्रस्ययथापुरंदरोबभूवहाहेतिवचस्तदानृणां ॥
२५ ॥ नेदुर्दुंदुभयोराजन्दिविदेवगणेरिताः ॥ तस्मिन्निपतितेपापेसौभेचगदयाहते ॥ २६ ॥
चि२ सखीनामपचितिंकुर्वन्दंतवक्त्रोरुषाभ्यगात् ॥ २७ ॥ इतिश्रीभागवतेदशमस्कंधेसप्तस
प्ततितमोध्यायः ॥ ७७ ॥ रामायनमः ॥ ॥ ॥

नैतद्वचनंसत्यमित्यर्थः ॥ किंतर्हिसत्यंतदाहतेषामुग्रप्रयोगैरिति ॥ २१ ॥ वर्मकवचंरुरोजबभंजरुजोभंगे
॥ २२ ॥ लयार्कसन्निभंप्रलयकालसूर्यसन्निभं ॥ २४ ॥ देवगणैरीरिताः किंचसखीनामिति ॥ २६ ॥ दशमे

॥ ७७ ॥ सप्तसप्ततितमः

राम॰ ५१

वतो ह्यस्य ततिवे भेदं तत्र वक्रविदूरथौ हत्वा हरिः पुरं प्रेमे वामः स्वतंततो नावधीत ॥ सर्वेषामप्यविशिष्टं वेनि न्यक्नं न दंवाह शि
शुपालस्येति पारोक्ष्यमौर्ध्वदेहिकं परोक्षकरणीयं सौहृदं कृत्यं ॥ अन्यथा तत्प्रतिक्रियाः ॥ ॥ मुकुंदं प्राह दुर्मदः दन्त्वादि ॥ ॥ बधिष्टेप
वतास्कू टदेवपरमार्थतस्तु दुर्मदः गतमदः प्राह मुकुंदं तत्रीये जन्मनि मुक्तिदानार्थमागतमद्येति जन्मत्रये श्रविष्यम्॥
एवं ब्रह्मशापावसाने भवान्मम स्वामी दृष्टिपथं गतः प्राप्तः पतद्दिष्ट्या ॥ नंदं ॥ ॥ अतिहर्षे द्विरुक्तिः ॥ पुंभ्यं किंच ॥ हे

श्रीशुकः ॥ शिशुपालस्य साल्वस्य पौंड्रकस्यापि दुर्मतिः ॥ परलोकगतानां च कुर्वन्पारोक्ष्यसौहृदं ॥ १ ॥ ए
कः पदातिः संक्रुद्धो गदापाणिः प्रकंपयन् ॥ पद्भ्यामिमां महाराज महासत्त्वो व्यदृश्यत ॥ २ ॥ तं तथायांतमा
लोक्य गदामादाय सत्वरः ॥ अवप्लुत्य रथात्कृष्णः सिंधुं वेलेव प्रत्यधात ॥ ३ ॥ गदामुद्यम्य कारूषो मुकुंदं प्रा
ह दुर्मदः ॥ दिष्ट्या दिष्ट्या भवानद्य मम दृष्टिपथं गतः ॥ ४ ॥ त्वं मातुलेयो नः कृष्ण मित्रध्रुङ्मां जिघांससि ॥ अतस्त्वां
गदया मंद हनिष्ये वज्रकल्पया ॥ ५

॥ ॥

कृष्ण त्वमस्माकं मातुलेयो बंधुः एवमपि मित्रध्रुक् मित्राणि घातितवान ॥ मां च जिघांससि ॥ तस्मादस्माकं बंधोः मम स्व
जनकार्यानुग्रहः प्राप्तानृणं दुर्वारः ॥ अतस्त्वामेतावन्मात्रमहं याचे ॥ किं तदाह हे कृष्ण ह्येवं दर्शवसहनसमर्थत्वात्र धर्मेण त्वा
मे वितुमादयान्वयं हनिष्य इह विष्णामि तमिकवायंस हसेति ॥ नन्वत्र तुल्यात्वद्धं दांकोभ्वासहेतं तैव वमित्याह वज्र
कल्पयाऽन्यत्र मालावदति कोमलयेत्यर्थः ॥ न तेवं हननेनेकः तव पुरुषार्थः तमाह नर्हीति ॥ ५ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रकृतं न विद्यते लोपः स्मात् देहस्थं देहज इत्यर्थः॥६॥ स्वामिनमेन तद्देहसंबंधेन बंधुरूपं ब्रह्मशापेन तु सनकादिशापेन तु ज्ञात्वा
न प्रतीतं वा हत्वा मित्राणामानृण्यं उपैष्यामि [illegible] विशेषेणाथ यते मनसा चिंत्यते इति व्या

ततोऽनृण्यमुपैम्यज्ञ मित्राणां मित्रवत्सलः। बंधुरूपमरिं हत्वा व्याधिं देहचरं यथा॥६॥ एवं
रूक्षैस्तुदन्वाक्यैः कृष्णं तोत्रैरिव द्विपं। गदयाताडयन्मूर्ध्नि सिंहवद्व्यनदच्च सः॥७॥ गदयाभि
हतोऽप्याजौ न चचाल यदूद्वहः। कृष्णोऽपि तमहन्गुर्व्या कौमोदक्या स्तनांतरे॥८॥ गदा
निर्भिन्नहृदय उद्वमन्रुधिरं मुखात्। प्रसार्य केशबाह्वंघ्रीन्धरण्यां न्यपतद्व्यसुः॥९॥ त
तः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतम्। पश्यतां सर्वभूतानां यथा चैद्यवधे नृप॥१०॥
विदूरथस्तु तद्भ्राता भ्रातृशोकपरिप्लुतः। आगच्छदसिचर्माभ्यामुच्छ्वसंस्तज्जिघांसया॥११॥
तस्य चापततः कृष्णः चक्रेण क्षुरनेमिना। शिरो जहार राजेंद्र सकिरीटं सकुंडलं॥१२॥
एवं सौभं च शाल्वं च दंतवक्रं सहानुजं। हत्वा दुर्विषहानन्यैरीडितः सुरमानवैः॥१३॥
मुनिभिः सिद्धगंधर्वविद्याधरमहोरगैः। अप्सरोभिः पितृगणैर्यक्षैः
किन्नरचारणैः॥१४॥ ॥

धिः देहेऽन्तर्यामि तथा च वक्ष्यति जितयान मोक्षं हत्वा वा अथर्मेण [illegible] देहेऽन्तर्यामि स्वज्ञानार्थं ज्ञानात्मानेति।
वानेन यथा पि चादीनां आनृण्यं उपयातिन ॥६॥ रूक्षैरित्यादि प्रतीत्य भिप्रायेणातोत्रैरंकुशादिभिः ७

एवंश्रीकृष्णस्यमहाबलानपिलीलयाजयत्येवेतिकृष्णस्यकराविज्ञतामसंधादिभिर्निर्जितः इतिपशुदृष्टीनामीयते॥१६॥ तत्र
संग्रामाहस्कृष्णेति॥१७॥ प्रतिस्रोतेनप्रतिलोमं॥१९॥ सुदर्शनंतीर्थंचक्रतीर्थं॥२०॥ यमुनामनुयानितीर्थानिगंगामनुयानिचतान

उपगीयमानविजयः कुसुमैरभिवर्षितः॥ वृतश्चवृष्णिप्रवरैर्विवेशालंकृतांपुरीं॥१५॥ एवंयोगीश्वरःकृष्णोभ
गवान्जगदीश्वरः॥ ईयतेपशुदृष्टीनांनिर्जितोजयतीतिसः॥१६॥ विद्रुतयोगमायामिथ्याहतनादिदनोकुले कृष्ण
त्वयारमत्तातदामोहिनस्तवबललो॥१७॥ श्रुत्वायुद्धोद्यमंरामःकुरूणांसहपांडवैः॥ तीर्थाभिषेकव्याजेनमध्य
स्थः प्रययौकिल॥१८॥ स्नात्वाप्रभासेसंतर्प्यदेवर्षिपितृमानवान्॥ सरस्वतींप्रतिस्रोतंययौब्राह्मणसंवृतः॥१९
पृथूदकंबिंदुसरस्त्रितकूपंसुदर्शनं विशालंब्रह्मतीर्थंचचक्रंप्राचीसरस्वतीं॥२०॥ यमुनामनुयान्येवगं
गामेवचभारत॥ जगामनैमिषंयत्रऋषयःसत्रमासते॥२१॥ तमागतमभिप्रेत्यमुनयोदीर्घसत्रिणः॥ अभि
नंद्ययथान्यायंप्रणम्योत्थायचार्चयन्॥२२॥ सोर्चितःसपरीवारःकृतासनपरिग्रहः॥ रोमहर्षणमासीनंम
हर्षेःशिष्यमैक्षत॥२३॥ अप्रत्युत्थायिनंसूतमकृतप्रह्वणांजलिम्॥ अध्यासीनंचतान्वि
॥प्रांश्चुकोपोद्वीक्ष्यमाधवः॥२४॥

निसर्वाणिगत्वानैमिषारण्यंजगाम॥२१॥ अभिप्रेत्यज्ञात्वामरुतिज्ञाना॥२२॥ महर्षेर्व्यासदेवस्य॥२३॥ सूतंप्रतिलोम
जंमकृतंप्रह्वणंनमनंप्रांजलिश्चयेनतं अध्यासीनंचतान् तेभ्योप्युच्चैरासीनमित्यर्थः॥२४॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग० उत्त० ८३

अज्ञानतनुभ्यावास्ते इति चेत्तत्रैवेत्याह अन्येषामिति ॥ २४ ॥ ननु बहुजनः कथमेवं कुर्यात्तत्राह ॥ २५ ॥ गुरुणीयद्ययोविनानुष्ठानाय विप्रा
न धर्मस्य सर्वज्ञात्मस्य हा किंचित्करो नानु किं तत्रैवमिति तत्राह यदर्थं इति ॥ २६ ॥ धर्मध्वजिनः उन्नमल्लिंगधारिणः ॥ २७ ॥ भाविनादितिन
हि भवितव्यं केनापि परिहर्तुं शक्यमनुमित्यर्थः ॥ अहह तदहह ॥ २४ ॥ तेन यात्राधार्मिकप्रतिलोमजन्मवधः को यमथ।

केस्मात्समाविमान्विप्रान्ध्यास्ते प्रतिलोमजः धर्मपालांस्तथैवास्मात्वधमर्हति दुर्मतिः ॥ ऋषेर्भगवतो भू
र्हि शिष्योधीत्य बहूनि च ॥ सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः ॥ ३५ ॥ अदांतस्य विनीतस्य वृथा
पंडितमानिनः ॥ न गुणाय भवंति स्म नटस्येवाजितात्मनः ॥ ३६ ॥ एतदर्थो हि लोकेस्मिन्नवतारो मया
कृतः ॥ वध्या मे धर्मध्वजिनस्ते हि पातकिनोधिकाः ॥ ३७ ॥ एतावदुक्ता भगवान्निवृत्तोसद्वधादपि ॥ भावि
त्वात्तं कुशाग्रेण करस्थेनाहनत्प्रभुः ॥ ३८ ॥ हाहेति वादिनः सर्वे मुनयः खिन्नमानसाः ॥ ऊचुः संकर्षणं देव
मधर्मस्ते कृतः प्रभो ॥ ३९ ॥ अस्य ब्रह्मासनं दत्तमस्माभिर्यदुनंदन ॥ आयुश्चात्माक्लममेतावद्यावत्सत्रं समा
प्यते ॥ ४० ॥ अजानतैवाचरितः त्वया ब्रह्मवधो यथा ॥ योगेश्वरस्य भवतो
नाम्नायोपि नियामकः ॥ ४१ ॥

मैवमिति चेत्तत्राहुः अस्येति ॥ ३९ ॥ शुश्रूषावनाय क्लान्तस्य नः शरीरस्य नास्ति क्लमं यस्मिंस्तदायुश्च दत्तमिति ॥ ४० ॥ ब्रह्मवधेपि
किं मम योगेश्वरस्येति चेत्सत्यमेव तथापि प्रायश्चित्तं कर्तव्यमेवेत्याह ॥ प्रायेणाहुः योगेश्वरस्येति ॥ पुराण साधनम्ना
म्नायो वर्णितो नहं तत्व इत्यादि लक्षणः ॥ ४१ ॥

८३

तथापि यत्त्वया ब्रह्महत्यायाः पावनं प्रायश्चित्तं । इह लोकपावनं व्रतं न्यवेदितः स्वयमेव भवान्यदि करिष्यति तर्हि
लोकसंग्रहो भविष्यति नान्यथेति ॥ २२ ॥ वधस्येति वेशं प्रायश्चित्तं प्रथमे कल्पे मुख्यकल्पे विधीयतां उपदिश्यतां किं
वा ॥ २३ ॥ व्रते हि मनयः पतत्स्य दीर्घमायुः संप्रवलेइंद्रियं तस्य पाटवं अन्यत्र यद्ब्रह्महत्याशासितं प्रोदितं तत्त्वं ब्र
न ॥ २४ ॥ ब्रह्मचारीणां मत्यत्वाद्यथा भवेत् । तथा विधीयतां निर्धः संपादयन्नाहस्त्रात्मा वा इति ॥ २५ ॥ ब्रह्मादंगात्मभवति दृया

यथा ब्रह्महत्यायाः पावनं लोकपावन । करिष्यसि भवांल्लोकसंग्रहो नान्यचोदितः ॥ २२ ॥ श्रीभगवानु
वाच ॥ कर्तव्यमनिर्देशं लोकानुग्रहकाम्यया ॥ नियमः प्रथमे कल्पे यावत्कस्तद्विधीयतां ॥ २३ ॥ दीर्घ
मायुर्बलं तस्य सम्यक्सिद्धिंद्रियं भवेत् ॥ आशासितं यद्ब्रह्म तत्साधयेद्योगमायया ॥ २४ ॥ उरस्व यकृत्तु: ॥ अस्त्र
स्य तवदीयुः सन्न्यास्यासां कमेवच ॥ यथा भवे हि देवः सत्यं तथा राम विधीयतां ॥ २५ ॥ श्रीभगवानु
वाच ॥ आत्मा वै पुत्र उत्पन्न इति वेदानुशासनं ॥ तस्मात्स्य भवेद्वक्ता आयुरिंद्रियसत्त्ववान् ॥ २६ ॥ ॥

रक्षिता यत ॥ आत्मा वै पुत्रनामासि त्वं जीव शरदः शतमित्यादिवेदानुशासनेवेदवचनेन तस्मादस्य रोमहर्षण
स्य पुत्रः उग्रश्रवाः भवतां ऋषीणां पुराणप्रवक्ता भवेत् । स चायुरादिमांश्च भवेत् । अतः सात्तादजीवनादस्त्रस्य मृत्यो
अमत्यता पुत्ररूपेण वायुरादिसिद्धिः । पुरुषद्वचनस्यापि सत्यता स्यादिति भावः ॥ प्रथमं तावद्वेदोदितं कथयत
तदहं करिष्यामीत्याह ॥ किं वा काम इति ॥ २६ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
द ७
टी
५९

न१

वि[…]षेयो वा कामो वर्त्तते न ह्येतन्निश्चयानंतरं ब्रह्मस्वं गृहीतमपचितिं निष्कृतिं । अजानतामेहे बुधाः यथावच्चिंत्यताम
पचितिर्निष्कृतिः प्रथमं तावदपेक्षितं न कर्तव्यं कथयेतिः इल्वलस्येति ३७ प्रायश्चित्तमाह तं पापमिति ३८ परीत्य प्रदक्षिणीकृ
त्य समाविनिर्घोषः सुसमाधानादिगुणविशेषादेकाहमात्रमुक्तमिति विशेषः सुसमाहितः कामक्रोधादिरहितः

१०

किं वः कामो मुनिश्रेष्ठा ब्रूताहं करवाण्यथ । अजानतं त्वपचितिं यथावच्चिंत्यतां बुधाः ॥ ३६ ॥ इल्वलस्य
सुतः इल्वलस्य सुतो घोरो बल्वलो नाम दानवः । स दूषयति नः सत्रमेत्य पर्वणि पर्वणि ॥ ३७ ॥ तं पापं
जहि दाशार्ह तन्नः शुश्रूषणं परं । पूयशोणितविण्मूत्रसुरामांसाभिवर्षिणं ॥ ३८ ॥ ततश्च भारतं वर्षं
परीत्य सुसमाहितः । चरित्वा द्वादशमासांस्तीर्थस्नायी विशुध्यसे ॥ ४० ॥ इति श्रीभागवते द
शमस्कंधे सूतवधबल्वलदेवतीर्थयात्रायामष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ श्रीशुकः । ततः पर्व
ण्युपावृत्ते प्रचंडः पांसुवर्षणः । भीमो वायुरभूद्राजन्पूयगंधस्तु सर्वशः ॥ १ ॥ ततोऽमेध्यमयं वर्षं
बल्वलेन विनिर्मितं । अभवद्यज्ञशालायां सोऽन्वदृश्यत शूलभृत् ॥ २ ॥ तं विलोक्य बृहत्कायं
भिन्नांजनचयोपमं । तप्ततामशिखाश्मश्रुं दंष्ट्रोग्रभ्रुकुटीमुखं ॥ ३ ॥ सस्मार मुसलं रामः परसै
न्यविदारणं । हलं च दैत्यदमनं ते तूर्णमुपतस्थतुः ॥ ४ ॥ राम

चरित्वा कृत्वा ॥ ४० ॥ इति श्रीभावार्थदीपिकायां दशमस्कंधेऽष्टसप्ततितमः ॥ ७८ ॥ ऊनाशीतितमे रामो बल्वलं निजघान ह । नि
हत्य तीर्थस्नानाद्यैः सूतहत्यामपानुदत् ॥ उपावृत्ते प्राप्ते ॥ १ ॥ भिन्नो विदीर्णः अंजनचयस्तदुपमा यस्य तं दंष्ट्राभिरुग्रे
भ्रुकुटीयुक्ते मुखे यस्य तं ॥ तप्ततामशिखावच्छ्मश्रूणि यस्य तं ॥ ३ ॥ ४ ॥ ॥ ॥



CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

महोगरुधिरेणदैत्यः शैलोयावभिः ॥ ६ ॥ श्रीयामानिप्रस्नानि पंकजानिप्रियस्योससंता ॥ ८ ॥ किंतत्त्वरोर्याद ८१
ति ॥ प्रस्रवत उद्गात ॥ ९ ॥ अनुस्रोतेनानुलोमतः पुलहाश्रमं हरिंद्वदं ॥ १० ॥ गोमत्यां गंडक्यां विपाशा

तस्मात्कृष्णहलाग्रेणवत्स्वृतं गगनेचरं ॥ मुसलेनाहनत्क्रुद्धोम्लस्भिन्नवलंदुर्दबलः ॥ ५ ॥ सोपत
दुर्विनिर्भिन्नललाटोसक्गूत्रमुत्सृजन् ॥ मुंचन्नार्तस्वरं शैलोयथावज्रहतोहरणः ॥ ६ ॥ संस्तुवंत
नर्मोरामंप्रयुंजाविनयाशिषः ॥ अभिषिंचन्महाभागाहृत्वंद्रं विबुधायथा ॥ ७ ॥ वैजयंतींददु
र्मालांश्रीयामाम्लानपंकजां ॥ रामायवाससीदिव्येदिव्यान्याभरणानिच ॥ ८ ॥ अथतैरभ्यनु
ज्ञातः कौशिकीमेत्यब्राह्मणैः ॥ स्नात्वासरोवरमगाद्यतः सरयुरास्रवत् ॥ ९ ॥ अनुस्रोतेनसर
युंप्रयागमुपगम्यसः ॥ स्नात्वासंतर्प्यदेवादीन्जगामपुलहाश्रमं ॥ १० ॥ गोमतींगंडकींस्नात्वा
विपाशांशोणआप्लुतः ॥ गयांगत्वापितृन्निष्ठ्वागंगासागरसंगमे ॥ ११ ॥ उपस्पृश्यमहेंद्राद्रौ
रामंदृष्ट्वाभिवाद्यच ॥ सप्तगोदावरींवेण्णांपंपांभीमरथींततः ॥ १२ ॥ स्कंदंदृष्ट्वाययौरामः
श्रीशैलंगिरिशालयं ॥ द्राविडेषुमहापुण्यंदृष्ट्वाद्रिंकीकटप्रभुः ॥ १३ ॥ ऋषभाद्रिंहरेःक्षेत्रं
दक्षिणांमथुरांतथा ॥ सामुद्रंसेतुमगमन्महापातकनाशनं ॥ १४ ॥ कामकोष्णींपुरींकांचीं
कावेरींचसरिद्वरां ॥ श्रीरंगाख्यंमहापुण्यंयत्रसंनिहितोहरिः ॥ १५ ॥

शोणेचाप्लुतः स्नातः मथुरांच
येत्यस्नात्वाद्दृष्ट्वासंस्पृश्य ॥ ११ ॥ श्रीशैलंश्रीपर्वतं ॥ १३ ॥ कांचीचपुरी ॥ १४ ॥ सामुद्रंदक्षिणमर्णवं ॥ १५ ॥ ॥

श्री
भाग
उ टी
५५

फाल्गुणं च नंदनं चैव पंचाशत्सु समंततः ॥ १८ अस्पर्शत अस्पृशत केवलादीन् देशान् ॥ १९ द्वीपमयनं

तत्रापश्यत्सदा हृष्टे नंदीश्वरगणेभ्यो हल्लापुत्र थः ॥ कृतमालीं तान् अपर्णामिमलयं च कलावल्लं ॥ १९
तत्रागस्त्यं समासीनं नमस्कृत्याभिवाद्य च ॥ देवांतितस्तेन चाशीर्भिः रनुज्ञातो गतो गिरं ॥ १९
दक्षिणं तत्र कन्याख्यां दुर्गां देवीं ददर्श सः ॥ ततः फाल्गुनमासाद्य पंचाप्सरसमुत्तमं ॥ १८
विष्णुः सन्निहितो यत्र स्नात्वा नास्य पंक्तिवा युक्तं ॥ ततोभिवृज्य भगवान् केरलांस्तांस्त्रिगर्तकान् ॥ १९
गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः ॥ आर्यां द्वैपायनीं दृष्ट्वा शूर्पारकमगाद्बलः ॥ २०
तापीं पयोष्णीं निर्विंध्यां चोपस्पृश्याथ दंडकं ॥ प्रविश्य रेवामगमद्यत्र माहिष्मती पुरी ॥ २१
मनुतीर्थमुपस्पृश्य प्रभासं पुनरागमत् ॥ २२ श्रुत्वा द्विजैः कथ्यमानं कुरुपांडवसंयुगे स
र्वराजन्यनिधनं भारं मेने हृतं भुवः ॥ २३ स भीमदुर्योधनयोर्गदाभ्यां युद्ध्यतोर्मृधे ॥ वारयिष्य
न्विनशनं जगाम यदुपुंगवः ॥ २४ ॥ युधिष्ठिरस्तु तं दृष्ट्वा यमौ कृष्णार्जुनावपि ॥ अभिवा
द्याभवंस्तूष्णीं किं विवक्षुरिहागतः ॥ २५ गदापाणी उभौ दृष्ट्वा संरब्धौ विजयैषिणौ ॥ मंडः
लानि विचित्राणि चरंताविदमब्रवीत् ॥ २६ युवां तुल्यबलौ वीरौ हे राजन् हे वृकोदर ॥ एकं
प्राणाधिकं मन्ये उतैकं शिक्षयाधिकम् ॥ २७ ॥

यस्मात्तीर्थानि ॥ २१ विनशनं कुरुक्षेत्रं ॥ २४ विवक्षुः वक्तुमिच्छुः ॥ किं वदिष्यतीति भियात्तूष्णीमासन्नि
ति ॥ २५ ॥ २६ ॥ २७ ॥ ॥

राम
५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अन्योः परान्वयः बलः संग्रामः॥२७ अथेव हाक्यं॥२९ दिष्टं प्राचीनं कर्म समुपागतः॥३० क्रत्वंगं यज्ञ
मूर्तिं॥३१॥ आत्मनि अथ विश्वनेविश्वगं सर्वात्मकं तं येनैव विदुः॥ पश्यंति तत् विशुद्धं विज्ञानं व्यतरत॥३२

तस्मादेकतरस्येह युवयोः समवीर्ययोः॥ नलक्ष्यते जयोन्यो वा विरमत्वफलो रणः॥२८॥
नतद्वाक्यं जगृहतुर्बद्धवैरौ नृपार्थवत्॥ अनुस्मरंतावन्योन्यं दुरुक्तं दुष्कृतानि च॥२९॥ दि
ष्टं तदनुमन्वानो रामो द्वारवतीं ययौ॥ उग्रसेनादिभिः प्रीतैर्ज्ञातिभिः समुपागतः॥३०॥ तं पुन
र्नैमिषं प्राप्तमृषयोयाजयन्मुदा॥ क्रत्वंगं क्रतुभिः सर्वैर्निवृत्ताखिलविग्रहं॥३१॥ तेभ्यो विशु
द्धविज्ञानं भगवान्व्यतरद्विभुः॥ येनैवात्मन्यदो विश्वमात्मानं विश्वगं विदुः॥३२॥ स्वपत्न्यव
भृथस्नातो ज्ञातिबंधुसुहृद्वृतः॥ रेजे स्वज्योत्स्नयेवेंदुः सुवासाः सुष्ठ्वलंकृतः॥३३॥ ईदृग्विधा
न्यसंख्यानि बलस्य बलशालिनः॥ अनंतस्याप्रमेयस्य मायामर्त्यस्य संति हि॥३४॥ येनु
स्मरेत रामस्य विस्नोः स दयितो भवेत्॥३५॥ इति श्रीभागवते दशमस्कंधे बलदेवतीर्थया
त्रागमनं नामैकोनाशीतितमोध्यायः॥७९॥ श्रीराजोवाच॥ भगवन्यानि चान्यानि मुकुंद
स्य महात्मनः॥ वीर्याण्यनंतवीर्यस्य श्रोतुमिच्छामि हे प्रभो॥१॥

कर्माण्यद्भुतकर्मणः। सायंप्रातरनंतस्य २

इति श्रीभावार्थे दशमे एकोनाशीतितमः॥७९॥ अथाशीतितमे कृष्णः श्रीदामानं गृहागतं संपूज्य २१
श्रृंगे कृत्वा सकथां पुरा॥ सुरातिमात्रकोहरिः पृथाचकार शंसनं॥ अतः परं विनैव तं निजोपकारस्मावन

८ [illegible]

श्री० भा० द० उ० टी० ५८

उत्तमश्लोकस्य सत्योमनोहराः ॥ विषयवैतस्यजनकाः ॥ विगतातस्तापियासानतस्याभावं वैतस्यतानाः
कस्याः विशेषज्ञः सारविदुविषमः ॥ विप्रादंप्राक्षः कथाश्रवणास्त्ववन् ॥ दृष्टांतांतरतयान्यानर्थीनाह
सविगिति ॥ २ ॥ तामेव करोतित्कर्मकर्तारीमनस्युतदेवमनः यत्स्थिरंजंगमानिचतेषु ... वसंतंतस्मरेयः
तस्यपुण्यकथां श्रुणोतिसपवकर्णः ॥ ३ ॥ उभयलिंगस्थिरंजंगमंचतस्यैवलिंगामितिचमत्वाश्रानमेत् — मेवं स्थावराणि च जंगमानि ...

कोत्वच्युतस्यासक्तहृल्लिनेत्रमश्लोकसत्कथाः ॥ विष्मतेनविशेषज्ञोविषमः कामसार्गिणः ॥ २ ॥
सावाभयातस्यगुणाणदलीनेकरौचतत्कर्मकरोमनस्तु ॥ स्मरेद्वसंतस्थिरंजंगमेषुश्रृणोति
तत्पुण्यकथाः सकर्णः ॥ ३ ॥ शिरस्तुतस्योभयलिंगमानमेत्तदेवयत्पश्यतितद्धिचक्षुः ॥ अंगा
निविस्तोरथ्यतज्जनानांपादोदकंयानिभजंतिनित्यं ॥ ४ ॥ सूतउवाच ॥ विस्तृतानेनसंष्टश्शोभ
गवान्बादरायणिः ॥ वासुदेवेभगवतिनिमग्नहृदयोब्रवीत ॥ ५ ॥ श्रीशुकउवाच ॥ कृष्णस्या
सीत्सखाकश्चिद्ब्राह्मणोब्रह्मवित्तमः ॥ विरक्तइंद्रियार्थेषुप्रशांतात्माजितेंद्रियः ॥ ६ ॥ यदृच्छ
योपपन्नेनवर्तमानोगृहाश्रमी ॥ तस्यभार्याकुचैलस्यक्षुत्क्षामाचतथाविधा ॥ ७ ॥ पतिव्रता
पतिंप्राह म्लायताबदनेनसा ॥ दरिद्रसीदमानावेपमानाभिगम्यच ॥ ८ ॥ ॥

त्तदेवशिरः ॥ तदेवजत्सलिंगामितिमत्वायत्पश्यतितदेवचक्षुः ॥ नान्येवांगानियानिपादोदकंभजंति
५ ॥ तस्याविधाकुचैलाकिंचित्क्षुत्क्षामायत्किंचित्संपन्नेनतस्मैपरिविष्यस्वयंत्वभाजीर्णा ॥ ७ ॥ म्लायता
मुखेनासीदमाना ॥ भर्तृभोगसंपादनाशक्ताप्रवसीदतीववेपमाना ॥ ८ ॥ ॥

रामः ५८

भोजवृष्ण्यंधकेश्वर इति ॥ तत्स्वीकारमात्रेण सर्वे ते दास्यंतीति भावः ॥११॥ नात्यभीष्टान्परिपाकविरस
त्वात् ॥१२॥ अप्यस्ति किमस्तीति प्रश्नः ॥१४॥ मह्यं मम गुल्मानि सैन्यस्थानानि कक्ष्याः प्रतोलीः अतीयाय
प्रतिकक्ष्यं जगाम स सद्विजः ॥ द्विजैः सहितः ॥१६॥ ततश्चागम्या दुर्गमाः । येंधकावृष्णयस्तेषां गृहेषु तः

नू

ननु ब्रह्मन्भगवतः सखा साक्षाच्छ्रियःपतिः ॥ ब्रह्मण्यश्च शरण्यश्च भगवान्सात्वतर्षभः ॥९॥
तमुपैहि महाभाग साधूनां च परायणं ॥ दास्यति द्रविणं भूरि सीदते ते कुटुंबिने ॥१०॥ आस्ते धुना
द्वारवत्यां भोजवृष्ण्यंधकेश्वरः ॥ स्मरतः पादकमलमात्मानमपि यच्छति ॥११॥ किंन्वर्थकामान्भ नू२
जतो नात्यभीष्टान्जगद्गुरुः ॥ एवं स भार्यया विप्रो बहुशः प्रार्थितो मुहुः ॥१२॥ अयं हि परमो ला
भ उत्तमश्लोकदर्शनं ॥ इति संचिंत्य मनसा गमनाय मतिं दधे ॥१३॥ अप्यस्त्युपायनं किंचिद्गृ
हे कल्याणि दीयतां ॥ याचित्वा चतुरो मुष्टीन्विप्रान्पृथुकतंडुलान् ॥१४॥ चैलखंडेन तान्बद्ध्वा भ
र्त्रे प्रादादुपायनं ॥ स तानादाय विप्राग्र्यः प्रययौ द्वारकां किल ॥१५॥ कृष्णसंदर्शनं मह्यं कथं
स्यादिति चिंतयन् ॥ त्रीणि गुल्मान्यतीयाय तिस्रः कक्ष्याः स सद्विजः ॥१६॥ विप्रोऽगम्यांधवृष्णी
नां गृहेष्वच्युतधर्मिणां ॥ गृहं द्व्यष्टसहस्राणां महिषीणां हरेर्द्विजः ॥१७॥ ॥

प्राह्ने ॥ द्व्यष्टसहस्राणां च ये गृहाः ॥ तेषु च मध्ये श्रीमदेकतमं गृहं विवेश ॥ तथा च सद्विजो ब्राह्मणा
नेदं गतो यथा न था च भूदेति शेषः ॥१७॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा॰ द॰
उ॰ टी॰
५०

अद्भिर्दृष्ट्वानेदास्वृणि ॥ १८ ॥ समर्हणम् मधुपायनं उपस्थितं समर्प्य पादावनेजनी ॥ ५ः ॥ २० ॥ धमनीभिः सततंव्याप्तं

विवेशैकतमं श्रीमद्ब्रह्मानंदं गतो यथा ॥ तं विलोक्याच्युतो दूरात् प्रियापर्यंकमास्थितः ॥ १५ ॥
सहसोत्थाय चाभेत्य दोर्भ्यां पर्यग्रहीन्मुदा ॥ सख्युः प्रियस्य विप्रर्षेरंगसंगति निर्वृतः ॥ प्रीतो
व्यमुंचदब्बिंदून्नेत्राभ्यां पुष्करेक्षणः ॥ १८ ॥ अथोपवेश्य पर्यंके स्वयं सख्युः समर्हणं ॥ उपाहृ
त्यावनिज्यास्य पादौ पादावनेजनीः ॥ १९ ॥ अग्रहीच्छिरसा राजन् भगवान् लोकपावनः ॥ २० ॥ व्यलि
पद्दिव्यगंधेन चंदनागुरुकुंकुमैः ॥ धूपैः सुरभिभिर्मित्रं प्रदीपावलिभिर्मुदा ॥ २१ ॥ अर्चित्वावेद्य तांबू
लं गांश्च स्वागतमब्रवीत् ॥ २२ ॥ कुचैलं मलिनं क्षामं द्विजं धमनिसंततं ॥ २२ ॥ देवी पर्यचरत्साक्षा
च्चामरव्यजनेन वै ॥ २३ ॥ अंतःपुरजनो दृष्ट्वा कृष्णेनामलकीर्तिना ॥ विस्मितोऽभूदतिप्रीत्या अव
धूतं सभाजितं ॥ २४ ॥ किमनेन कृतं पुण्यमवधूतेन भिक्षुणा ॥ श्रिया हीनेन लोकेऽस्मिन् गर्हि
तेनाधमेन च ॥ २५ ॥ योऽसौ त्रिलोकगुरुणा श्रीनिवासेन संभृतः ॥ पर्यंकस्थां श्रियं हित्वा परि
ष्वक्तोऽग्रजो यथा ॥ २६ ॥ कथयांचक्रतुर्गाथाः पूर्वा गुरुकुले सतोः ॥ आत्मनोर्ललि
ता राजन् करौ गृह्य परस्परम् ॥ ॥ २७ ॥ ॥ श्रीमते रामानुजाय नमः ॥ ॥

हृ ॥ अवधूतं मलिनं विस्मयमाह ॥ २४ ॥ संभृतः संमानितः ॥ २५ ॥ सतोर्वसतोर्गृह्य गृहीत्वा ॥ २७ ॥
श्रीराम ॥ ॥ ॥ ॥ ॥ राम ॥ ॥ राम।

राम॰
५०

भार्यापुत्रितीनानवेति गृहस्थलिंगादर्शनात् ॥ भोगादर्शनाच्च संशयादिव प्रश्नः ॥ अप्रतिषेधाद् द्वा
दशाद्वैतेमत्वाद आयदृति २८ ॥ तर्हि नैवविन्नेस्तनमकामविहृतेकामैर्विहितं न भवतीति मेविद्धि सन्तः
ष्याद्विधनवत्वादि पुनैवानि श्रीयुसेहेविद्धत्रितिविदुषस्तवैवनयुक्तमितिभावः ॥ कामहृतत्वाभावे
किं गृहस्थमेकेशेनेत्याशंक्याह ॥ केविदिति दैवीं देवस्य माया च विनाः प्रकृतिर्विषयवासनांसंजेतःकामे
राभिलाषेननाविद्यचेतसामपिकमेकवर्णदृष्टांतः ॥ यथाहमिति लोके संग्रहैवं रूपयथा भवति तथाहं
मोर्भिष्यरोपिकमोगिकरोनीतिनदृत ॥ ३ ॥ नोः श्रावयोः गुरोर्विद्वेषपरमात्मन्येतमसः ॥ संसारस्यनया

श्रीभगवानुवाच ॥ अपिवलु गुरुकुलाद्दवताल अदतिगामनेसमाहनेनेथर्मत्र भार्योदासह
पीनिवा ॥ २८ ॥ प्रायोगृहस्थप्रुतेविन्नमकामाविहृतेतथा ॥ नैवानि श्री सेविद्धयेनेषुविदितेद्वि
षोः ॥ ३९ ॥ केचिद्विकेवृतिक नामेरह्य नेतमसः ॥ त्यजेतः प्रकृतीदैवीर्यथाहं लोकसंग्रहम्
कविदुरुकुलेवासंब्रह्मत्रमवृत्तिनेयप्ते द्विजोवितथ्यविन्नेयतमसः एवं रागुने ॥ ३ ॥ सर्वेः
सत्कर्मणांसाक्षाद्द्विजानेविहसंभवः ॥ योगयज्ञाश्रमिणांयथाहंज्ञानदोगुरुः ॥ ३२ ॥ ॥

सत्र
तत्वज्ञानप्रदस्यगुरोरन्यंतंश्रूयतेववंकेपुरुषस्यदीनगुरुनाह ॥ ३ ॥ गृहस्थसंसारे यत्स्थसंभवः जन्ममात्रे
सविज्ञानावदाय्यः ॥ प्रथमोगुरुःस्मृत्यः कर्मविद्याप्रदेगुरुमाह ॥ द्विजातेःसतःपुंसः सत्कर्मणांयत्रसंभ
वः ॥ उपनीयवेदाध्यापयंकर्मरस्यर्थः ॥ सद्वितीयोगुरुः ॥ यथाहमीश्वरः प्रथमादपिसृष्टपरत्वर्थः ॥ ब्रह्म
विद्याप्रदंगुरुमाह ॥ आश्रमिणांसर्वेषां ज्ञानदेयः ॥ सत्वसाक्षादहमेवेति अतोज्ञानप्रगुरुरूपंमामुपा
८८
श्रित्यये संसारंतितेबुद्धिसेनरत्याह नविवेति ॥ ३३ ॥ ॥

नदं मपिर

श्री॰
भा॰ द॰
उ॰ टी॰
५८

द्वेषंतेनतुवर्णाश्रमवतांमध्येश्रेष्ठ्यंको॥विदां मन्वा जन्मनित्वापिवर्णाश्रमवेषनिषेधमयागुरु
रूपेणवक्त्रावाचाउपदेशमात्रेणपूज्य: सुविनैवमवाणावेतरेतित्ज्ञानप्रदातृत्वोपिक: ॥ सेव्योना
लीनस्यनेत्रनएवनद्रजनादपिकोपि॰ ग्रामालीनाहनाहमिति ॥ २३ ॥ इज्याग्रहस्थधर्म: प्र जा
ति: प्रकृष्टंजन्मउपनयनेनेनब्रह्मचारिधर्मउपलक्ष्यतेनाभ्यानयोगीमावनस्थधर्मेणउपशमे
नयतिधर्मेणवाश्रमेश्रीपरमेश्वर: ॥ नथानत्वेवंयथामर्वभूतात्मानिगुरुशुश्रूषयेतिकिंवास्म

नन्वर्थकोविदाब्रह्मन्वर्णाश्रमवतामिह ॥ येमयागुरुणावाचातरन्त्यंजो भवार्णवं ॥ २२
नाहमिज्याप्रजातिभ्यांतपसोपशमेनच ॥ तुष्येयंसर्वभूतात्मागुरुशुश्रूषयायथा ॥ २३
अपिनःस्मर्यतेब्रह्मन्निवसतांगुरौ ॥ गुरुदारैश्चोदितानामिंधनानयनेक्वचित् ॥
२४ ॥ प्रविष्टानांमहारण्यमपर्तौसुमहद्द्विज ॥ वातवर्षमभूत्तीव्रंनिष्ठुराःस्तनयित्नवः ॥
२५ ॥ सूर्यश्चास्तंगतःतावत्तमसाचावृतादिशः ॥ निम्नंकूलंजलमयंनप्राज्ञायतकिंचन ॥
यं॰
॥ २६ ॥

केगुरुशुश्रूषणंकिमपिदैवमेपत्रेंकिंनयाल येनेइतिष्टकामीपिन इति ॥ २४ ॥ गुरौनिवस
तामस्माकंयत्किमपिहृतंतत्कुत्रचित्कदाचित् ॥ २५ ॥ अपर्तौअपगते ऋतौअकालेइत्यर्थः
वातश्चवर्षंचतयोः समाहारः स्तनयित्नवोमेघागर्जितानिवाभवन् ॥ २६ ॥ निम्नंकूलेन
नम्रत्रतंवस्थाने ॥ २७ ॥ ॥ रामायनमः ॥ ॥

राम॰
५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मनूराणो इत्यस्माज्ज्ञातोऽपरितः ॥ वश्चिमद्गुरागमः छन्दोदसः भावानभूतवंत इत्यर्थः ॥ अग्रेबूनां संप्लवः व्यामिश्र
णां यस्मिंस्त्रैकोदके तस्मिन्वन इत्यर्थः ॥ ३० ॥ उवाच कृपया श्लोकत्रयीं यथावदुक्तानां इत्याह ॥ अहो इति
३१ ॥ गुरोर्निष्कृतिः प्रत्युपकारः ॥ सर्वार्थात्मार्पणं सर्वैर्यथाः ॥ यस्मात्स आत्मा देहस्तस्यार्पणं विनियोगः
धस्त्रियानयामानियातोयामोयस्यतस्यतत ॥ गतसारं भवति तद्वत्तरः [illegible] द्वा [illegible] पि गतेक्षा रंगोऽण्याह न्याया

वयं भृशं तत्र महानिलांबुभिर्निहन्यमाना मुहुरंबुसंप्लवे ॥ दिशोऽविदंतोऽथ परस्परं वनेऽट
हीन् हस्तावपि विविश्रमातुराः ॥ ३२ ॥ एतद्विदित्वा उदिते रवौ सांदीपनिर्गुरुः ॥ अन्वेषमाणो नः
शिष्यानाचार्योऽपश्यदातुरान् ॥ ३३ ॥ अहो हे पुत्रका यूयं अस्मदर्थेऽतिदुःखिताः ॥ आत्मा वै प्रा
णिनां प्रेष्ठः तमनादृत्य मत्पराः ॥ ३४ ॥ एतदेव हि सच्छिष्यैः कर्तव्यं गुरुनिष्कृतिः ॥ यद्वै विशु
द्धभावेन सर्वार्थात्मार्पणं गुरौ ॥ ३५ ॥ तुष्टोऽहं भो द्विजश्रेष्ठाः सत्याः संतु मनोरथाः ॥ छंदांस्ययात
यामानि भवंत्विह परत्र च ॥ ३६ ॥ एवंविधान्यनेकानि वसतां गुरुवेश्मसु ॥ गुरोरनुग्रहेणैव
पुमान्पूर्णः प्रशांतये ॥ ३७ ॥ ब्राह्मण उवाच ॥ किमस्माभिरनिर्वृत्तं देवदेव जगद्गुरो ॥ भवता स
त्यकामेन येषां वासो गुरावभूत् ॥ ३८ ॥ ॥

तया मम मिलनं यत्र ते ॥ गतसाराणि छंदांसि [illegible] अद्वितीयमात्मानि भवंतु इत्यर्थः ॥ ३६ ॥ एवं प्रकाराणि अनेका
नि हृत्वा नि किं तया स्मर्यते इति शेषः ॥ फलितमुपसंहरति गुरोरिति ॥ ३७ ॥ अस्माभिः किमनिर्वृत्तं न सम
संपन्नं येषामस्माकं भवता सह वासोऽभूत् ॥ भवतस्तु सर्वं मे न हि इंद्रवनमात्रमित्याह यस्येति ॥ ३८ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री· भा·द· उ·टी· ५५

स्वदेहोमयं वेदात्मं ... लाभं तच्छाश्रेयसामावपनं उद्भवस्थानं देहोमूर्तिर्यस्य तव ॥ ४५ ॥ इति श्रीभावार्थ
दीपिकायां दशमस्कंधे अशीतितमोऽध्यायः ॥ ८० ॥ एकाशीतितमे सख्युर्जग्ध्वा पृथुकतंडुलान् । श्रि
यं निर्मितवानिंदुतुल्यं ... भौमां तु तदाश्रमे ॥ संकथयन् स्वावगोष्ठीः ऊचेन सर्वभूतानामनोभिज्ञः

५ श्रीभगवद्ब्राह्मणसंवादे नामा ८१

यस्यकेदोमयं ब्रह्मदेहआवपनं विभो ॥ श्रेयसां तस्य गुरुषु वासोऽत्यंतविडंबनं ॥ ४५ ॥ इ
ति श्रीभागवते दशमस्कंधे अशीतितमोऽध्यायः ॥ ८० ॥ श्रीशुक उवाच ॥ स इत्थं द्विजमुख्ये
न सह संकथयन् हरिः ॥ सर्वभूतमनोभिज्ञः स्मयमान उवाच तं ॥ १ ॥ ब्रह्मण्यो ब्राह्मणं कृ
ष्णो भगवान् प्रहसन् प्रियं ॥ प्रेम्णा निरीक्षणेनैव प्रेक्षन् खलु सतां गतिः ॥ २ ॥ श्रीभगवा
नुवाच ॥ किमुपायनमानीतं ब्रह्मन्मे भवता गृहात् ॥ अण्वप्युपाहृतं भक्तैः प्रेम्णा भूर्ये
व मे भवेत् ॥ ३ ॥ भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्र
यच्छति ॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ ४ ॥ इत्युक्तोऽपि द्विजः तस्मै व्रीडितः पत
ये श्रियः ॥ पृथुकप्रसृतिं तस्मै न प्रायच्छदवाङ्मुखः ॥ ५ ॥ सर्वभूतात्मदृक्साक्षात्तस्या
गमनकारणं ॥ विज्ञाय व्यचिंतयन्नायं श्रीकामो माभजत्पुरा ॥ ६ ॥

मदर्थं पृथुकानानीय दातुं लज्जते इति जानन्नित्यर्थः ॥ १ ॥ प्रहसन् ... कुर्वन् ॥ २ ॥ लज्जया अकथय
तः नामपानुदत्वाह ॥ अण्वपीति द्वाभ्यां ॥ ३ ॥ सर्वभूतानामात्मदृक् ॥ अंतःकरणसाक्षी ॥ ६ ॥ ॥ ॥

राम· ५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अमर्त्यानां देवानामपि दुर्लभा॥८॥ अतितीर्णत्वात्॥ वाससः वर्सस्य पुनः तन्मध्ये वीरेण वद्धान॥९॥
अग्राहे सर्वे विश्वं विश्वात्मानं मां इति वदन्नेकां प्रति हिंस्राः तान्तरे त्वयं भावः॥१०॥ एतावता पुंसः दुर्लभ
वचमत्कदा तविलासभूतानां संपदां समहृदये॥ अलं अतः पर्वहिनीय प्रपश्चद नेनमामामेन तदर्थीनां ऊ
र्विंति॥ तत्रोषकारणेन वतोषस्य कारणं यथा॥ भवेत्तथा सर्वसंपत्समहृदये प्यो भक्तस्य समर्पितं दृष्ट्वा

पत्न्याः पतिव्रतायास्तु सरवा प्रियविकीर्षया॥ प्राप्तोमामस्य दासामिसंपदो मर्त्यदुर्लभाः॥८॥
इत्यादि विंस्य वसना च्छीरवद्दारिद्र तन्मनः॥ स्वयं जहार किमिदं वितिष्टस्तु क तन्दुलान्॥९॥
नन्वेतत् पत्नीनं मे परमसर्वणेन सखे। तर्पयं त्वंग मा विश्वमे निष्ठस्तु क तन्दुलाः॥१०॥ इति अधि
सत्कृत्य गच्छा द्वितीयां जगत्पुमात्दये। नावलक्ष्मीजेन्सदहेहसि तत्तन्पराय रमे छिन॥११॥ एतावता
लेविश्वात्मन्सर्वसंपत्समहृदये॥ अस्मिंल्लोके पावा अपि अस्य सखत्वतोषकारणं॥१२॥ ब्राह्म
णस्त्वां तु रजनीमुषित्वा अच्युतमंदिरे। भुक्त [illegible] वास्तु वत्सन्ने हात्मानं स्वगतं पयात्॥१३॥
सोभूतविश्वभावेन स्वस्तस्येवनाभिनंदितः॥ [illegible] रामस्वालयं नातप्य प्रत्युद्भ्य वंदितः॥१४॥

तत्पोषितेत्यर्थः॥१२॥ स्वर्गतं स्वर्गवासिनं॥ सोभूतेऽउदिनेरवौ विश्वभावयतीति विश्वभावः॥ तेनेति
पद्मनोभाः किं गं इन्द्रस्यकुलभं विभवं दर्शयति स्वस्य देवान्स्वानंद क्षुल्लेनेति दानेन अदीनत्वात् दर्शयति॥
वंदितोऽभिनंदितः क्रिमिः॥१५॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भा॰ द॰
उ॰ टी॰
१००

व्रीडितः स्वचित्तकार्पण्येन लज्जितः ॥ महतः श्रीकृष्णस्य दर्शनेन निर्वृतिमेवाह ॥ अहो इति चतुर्भिः ॥
१५ ॥ यद्यतः लक्ष्मीमुरसि बिभ्रता श्रीहरिणाहमालिंगितोहं ॥१६॥ पापीयान्नीचः ॥१७॥ पूजितः पादशु
हानिवेदनालेपनशय्यावासादिभिः ॥ एवं महत्वेपि धनस्याप्रदाने कारणं कल्पयति स्वर्गापवर्गयोरि
ले

स चालब्ध्वा धनं कृष्णान्न तु याचितवान्स्वयं ॥ स्वगृहान्व्रीडितोगच्छन्महद्दर्शननिर्वृतः ॥१५॥
अहो ब्रह्मण्यदेवस्य दृष्टा ब्रह्मण्यता मया ॥ यद्दरिद्रतमो लक्ष्मीमाश्लिष्टो बिभ्रतोरसि ॥१६॥
क्वाहं दरिद्रः पापीयान्क्व कृष्णः श्रीनिकेतनः ॥ ब्रह्मबंधुरिति स्माहं बाहुभ्यां परिरंभितः ॥१७॥
निवासितः प्रियाजुष्टे पर्यंके भ्रातरो यथा ॥ महिष्या वीजितः श्रान्तो बालव्यजनहस्तया ॥१८॥
शुश्रूषया परमया पादसंवाहनादिभिः ॥ पूजितो देवदेवेन विप्रदेवेन देववत् ॥१९॥ स्वर्गापव
र्गयोः पुंसां रसायां भुवि संपदाम् ॥ सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनं ॥२०॥ अधनोयं
धनं प्राप्य माद्यन्नुच्चैर्न मां स्मरेत् ॥ इति कारुणिको नूनं धनं मे भूरि नाददात् ॥२१॥ इति तं
चिंतयन्नंतः प्राप्तो निजगृहांतिकं ॥ सूर्यानलेंदुसंकाशैर्विमानैः सर्वतो वृतं ॥२२॥ ॥

तिद्वाभ्यां ॥२०॥ स्वर्गादीनां यद्यपि तस्य चरणार्चनमेव कारणं तथापि कारुणिकत्वात् अभूर्यपि धनं म ॥ ॥
भूरिनाददादित्युत्तरेणान्वयः ॥ निजगृहस्यांतिकं प्राप्तः ॥ तस्य विशेषणं सूर्येति ॥२२॥ ॥

३८

राम॰
१००

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दशमउत्तरार्द्ध पत्रे १४५ ग्रा रक्षा: १०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative